चित्तसम्बोधनम् of आत्मानन्द स्वामी
– Edited by पं० ब्रह्मदत्त द्विवेदी –
with several tri-colour illustrations.
Patna, 1996 Vikram era.

1413

15

Bill No. 5/07-08

SD

2008-0509

ॐ

चित्तसम्बोधनम्

श्रीहिमगिरि-मूर्धन्य-सौम्य-काशी-निवासिना

श्रीमदात्मानन्दस्वामिना सम्प्रणीतम्

श्री रामनिरञ्जनदास मुरारका-महाविद्यालय

प्रधानाध्यापकेन

न्याय-व्याकरण-साहित्याचार्येण

पण्डित श्री ब्रह्मदत्तद्विवेदिना

संशोधितम्


पाटलिपुत्रनिवासिना-

श्रेष्ठिलक्ष्मीनारायणजालानमहोदयेन


स्वीयधनव्ययेन मुद्रापयित्वा प्रकाशितम्

१९९६ वि. सं.

मुद्रक—
विद्याविलास प्रेस,
गोपाल मन्दिर लेन, बनारस सिटी ।
१९३९



अस्मद् दीक्षागुरु परमहंस श्री स्वामी योगानन्दजी (आलू वाले बाबा)



अस्मद् विद्यागुरु पूज्यपादश्री १०८ स्वामी तपोवनम्

श्रीः

भूमिका

श्रीपरमेश्वरप्राप्त्युपायभूतात्मदर्शनोत्पिपादयिषया पूर्वाचार्याः सकललोकानुजिघृक्षया अमितविस्तृतान् अतिसङ्क्षिप्तांश्च ग्रन्थान् परश्शतान् यथाधिकारि निबबन्धुः। ते च ग्रन्थाः अनेकानसारसंसारसागरनिमग्नान् इतः मुमुक्षून् उदधीधरन्। परान्त्विदानीं कुटिलकलौ कुतर्कनिष्पीतान्तःसाराणां मुकुलितान्तःकरणानां जनानां न पूर्वमिव तेषामुपयोग इति न परोक्षं प्रेक्षावताम्। अतएवेदानीन्तनानां परिनिष्ठितवाङ्मयेन स्वल्पेन समयानुसारेण हृदयग्राहितदुपेदशमिच्छतां गृहिणामपि चिरमनोरथं समपूपुरदिदं ग्रन्थरत्नम्। तपःपूर्णानुभवितुरुपदेशो यथा हृदयं प्रविश्य फलेन संयुनक्ति न तथा तदितर इति न केषामपि करपिहितमिव। अस्मिन् ग्रन्थरत्ने मनः संबोध्य निखिलमभिधित्सितं तत्वं समुपादिशद् ग्रन्थकारः। कल्पनाशीलं मन एवानवच्छिन्नोदासीनपरमानन्दघनैकरसे चिदात्मनि निर्मलाकाशे कुहकमिव द्वैतजातं प्रकल्प्य पुरुषं प्रमाद्य चिरं तातपीतीति सर्वानुभवसिद्धम्। तदेव दुःखमूलकल्पनानिवृत्त्यै प्रबोधनीयमिति सर्वथा समुचितस्तदधिकृत्य

सदुपदेशः । सर्वस्य चिरायापेक्षितममूदृक्षं सङ्क्षिप्तोपदेशनिबन्धं श्रीमन्तोऽन्वितार्थनामानस्त्यागैकरसाः श्रीयुतात्मानन्दमहात्मानो निर्माय समधिकमन्वग्रहिषुः ।

एतस्य महात्मनः श्रुतिसुखासेचकं सुचरितं शुश्रूषु कस्य सचेतसः शुभंयुहृदयं न स्यादित्यवधायानुभाविभव्याय च संक्षिप्य तदिह निरूपये प्रभूतोपचिकीर्षया ।

अथास्यागरामण्डलमण्डनस्य महाभिजनस्य महात्मनो मायामयविश्वविनश्वरविविधविषयरसनेषु विरसं परमेश्वराविकश्वरपादपङ्कजपरागरसनेष्वतिरासिकञ्च जन्मनः प्रभृत्येव मनः स्वयमासीत् । वालक्रीडोचितकाल एव पूर्वजन्मोपार्जितसुकृतपारिपाकवशात् भगवद्भक्तिरसामृतोर्मीसिक्तसूक्तश्रवणादिषु चिरं चेतोऽन्वराङ्क्षीत् ।

वालक्रीड़ोपनीतविविधप्रतिमासु प्रत्यभिज्ञाय प्रातिकृतिं पिनाकिपुण्डरीकाक्षयोः समादरेण विविक्तोचितदेशे समानीय यथावगतपूजाप्रकारैर्भक्तिपूर्णप्रणतान्तःकरणेन चिरमार्जिहदसौ । सदाचारविनयमाधुर्यवात्सल्यसत्यशौचशान्तिक्षमादिनिखिलोपादेयगुणैः परिपूर्णोऽसाधारणोऽयं पुरुषधौरेयो भवितेति जनैः सुखेन समज्ञायि ।

पित्रादिप्रेरणया ग्रामीणवालकविद्यामन्दिरेषु गुरूपदिष्टं पाठं


वालकैरितैरः सह समभ्यस्य परीक्षावसरे अभ्यासपरिपाकेन सद्व्यवहारेण च सर्वानत्यशेत । अवशिष्टसमये परमार्थविषयं स्वयं व्यचीचरत् । एवं क्रमेण कियन्तं कालमतिवाह्य शनैः शनैः पराग्विषयेषु चेतोऽपारजत । अथ परमार्थोपदेशजिघृक्षायै समुत्सुकमस्य चेतः किन्तु गुरोरपरिज्ञानात् क्व गच्छामि कं पृच्छामि किं करोमीत्यादिचिन्तया भृशमन्तरन्वताप्सीत् । अनन्तरमेकदा पवित्रतीर्थादिदिदृक्षया तत्र महात्मानो नूनं मिलिष्यन्ति समुपदेक्ष्यन्ति च नो निस्ताराय सन्मार्गमित्याशया च गोवर्द्धनगिरिमभिप्रतस्थे । तत्र महात्मानं श्रीगङ्गावक्समहोदयं सङ्गत्य प्रणतिप्रवणेन मूर्ध्ना प्रणम्य च सप्रश्रयमपृच्छत् । भगवन्नस्ति कश्चनोपायः संसारार्णवसन्तरणस्य ? यो भगवद्भक्तिप्रतिपत्तिपरश्च स्यात् प्राचीनपवित्रचरितानुष्ठितोऽस्मत्सुकरश्च । समाकर्ण्य चेदं सस्मेरमुखः स महात्मा अल्पवयसोऽनास्वादितसंसाररसस्यातएवानवाप्तैतत्कटुरसविपाकस्येदृशः प्रश्नो नूनमावेदयति पूर्वापूर्वप्राग्रहरतामिति गुरुप्रसीदता मनसाऽन्तः प्रशस्य समुदतीतरत् ।

अयि आयुष्मन् ? कौमारावस्थायामेव कथमीदृशः प्रश्नः ? इदानीमपरविद्याभ्यासप्रभवापूर्वप्रज्ञोपार्जितप्रभूतसम्पदा पूरय पित्रोः प्रमोदम् , कुलञ्च समुत्कर्षं प्रापय, प्रतिष्ठापय च

चिरम्, गार्हस्थ्याश्रमस्वीकारेण ऋणत्रयमपाकुरु, मित्राणि सन्तोषय शत्रून्निर्मूलय, ततश्चरमे वयसि श्रावयिष्यामि ते समीहितमित्यवोचत्।

अयञ्च तदुपदेशमङ्गीकृत्य यावत्सन्तानोदयं गृहस्थाश्रमेऽरंस्त। ततो विषयव्यावृत्तमनाः पूर्वाश्रमात्पुनरुपरम्य तमेव गुरुमुपससाद विनयेन व्यजिज्ञपच्च। इदानीं ब्रह्मविद्यामनुशाधि मामनन्यगतिकं संसारदावानलसन्तप्तम्। स च महात्मा चरमे वयसि शिक्षणीयोऽसि कुटुम्बपालनमिदानीं कुरु इति प्रोवाच।

भगवन् को जानीयात् कस्य वयः कदा चरमं भवेत्। एवमाशावतः पर्यन्ते शुभमनुतिष्ठासोर्मध्ये एवायुषः समाप्तौ सर्वे शुभसङ्कल्पा दरिद्रमनोरथवदेकपदे लीयन्ते। तस्मात् "गृहीत इव केशेषु मृत्युना धर्ममाचरेदि"ति न्यायेनादावेव कृतिनः स्वसमुद्धाराय प्रयतन्ते। अतएव शुकवामदेवादयो महर्षयो जन्मानन्तरमेव प्रवव्रजुरिति न्यवेदयत्। एवं श्रुत्वा प्रहृष्टान्तरात्मा महात्मा सदुपदेशं विधाय सञ्जातदृढविषयवैराग्यभावनमेनं श्रीपूज्ययोगानन्दस्य महात्मनस्सविधे प्राहिणोत्। स च महात्मा चित्तैकाग्र्यौपयिकं योगमुपदिदेश।



महामहोपाध्याय पं० श्री हरिहर कृपालु द्विवेदी विद्यारत्नाकर, विद्यानिधि
पंडित—विभूषण तर्कालंकार प्रधानाचार्य (प्रयाग)

एतेन दीक्षितः शिक्षितश्चायं ज्ञानपिपासुरुत्तरकाश्यां पूज्यपादतपोवनमहाराजेभ्यो ब्रह्मविद्यां समार्जिजत्। अद्यावधि च तानेव सेवमानोऽहर्निशं तदुपदेशादिशा आत्मानन्द आत्मना आत्मनि रमते।

विविधानवद्यविद्याविनयविवेकापनीताजेयविषयवासनः सत्यशमदमादिसाधनोपनीतपरमार्थपरिशीलनप्रबुद्धशुद्धमानसः परमहंससरणीरपायणोदासीनादीनमानसोऽयं स्वामिप्रवर आत्मानन्दः स्वानुभूतमशेषक्लेशविश्लेषसाधनमर्थं निखिललोकोपकृतये ग्रन्थे समुट्टङ्कय सर्वत्र प्रचिचारायिषया तममुद्रयत्। अनेन च लोको बहूपकृतः स्यादित्याशास्ते।

महामहोपाध्यायः

पं० हरिहरकृपालु द्विवेदी

प्रधानाचार्यः


पण्डितपञ्चानन, विद्यारत्नाकर, विद्यानिधि,
पण्डितविभूषण, तर्कालङ्कार-
विद्यासागरेत्याद्युपाधिविभूषितः

काशी
अक्षयतृतीया
१९९६

प्रस्तावना

अहो ! खल्वीश्वरेच्छाया अकुण्ठिता विचित्रा च गतिः । अघटितमपि सुघटितमातनोति सा । ईश्वरेच्छाहि मूकं वाचालं करोति, पङ्गुञ्च पर्वतमधिरोहयति, कुचेलञ्च कुबेरं विदधातीति नैतत्तिरोहितं विदुषां विचिन्तनशीलानाम् । तथाच मामपि ग्रन्थकारमकरोदीश्वरेच्छेति किमाश्चर्यन्तत्र । अहो ? क्वाहमल्पमतिरकृतकाव्यशास्त्रादिव्यवसायः, क्च महाशेमुषीसम्पन्नानां पण्डितप्रकाण्डानामपि महाऽऽयाससाध्या ग्रन्थकरणकला । तथाविधमतदर्हमपीमं जनं महत्तरं ग्रन्थकारपदमधिरोहयितुमीश्वर ऐच्छदिति का नाम तत्राघटितता । अहो ! ईश्वरेच्छाया अघटितघटनापटीयस्त्वम् ।

अथाति सङ्क्षेपतोऽस्माकं ग्रन्थकृत्पदाधिरोहणकथा कथ्यतेऽत्रपाठकानां पुरतः । यथाप्रतिभं सुरसरस्वत्यामनुभवपराणि लघुतराणि वाक्यानि विलिख्य सङ्ग्रहीतव्यानीति मे मतिरुदभूत् । स्वान्तर्विनोद एत तत्र नान्यः कश्चन हेतुरासीन्मम । ततश्च



ग्रन्थकारः स्वामी आत्मानन्दः

तादृशानि कतिपयानि वाक्यानि विलिख्य सम्मत्यर्थं गुरुपाद-परमपूज्यश्रीतपोवनस्वामिपादानुपागच्छम् । ते च तानि दृष्ट्वा सुष्ठु सुप्रसन्ना अभवन् । अथ चैतादृशानि वाक्यानि पृथग् विषयनिर्देशेनाधिकतया विलिख्य सङ्ग्रहीतुं प्रयत्नमाधत्स्वेति सप्रमोदञ्चाज्ञापितवन्तः । ततो मया वैराग्यविषयमधिकृत्य किञ्चित् किञ्चिदिव प्रतिदिनं तादृशानि वाक्यानि विलिखितुमारब्धानि । प्रतिदिनमेवविलिखितस्यांशस्य संस्करणसंशोधनादिकञ्च स्वामि-चरणैस्तत्क्षणमेव कृतमासीत् । तथाच तस्य प्रथमप्रकरणस्य परिपूर्तिरुत्तरकाश्यां श्रीविश्वनाथचरणसविध एव समभूद्यथाकालम् ।

श्रीस्वामिचरणाः प्रतिसंवत्सरं चातुर्मास्यकरणार्थं श्रीगङ्गो-त्तरीधाम नियमतो व्रजन्त आसन् । ते खलु तं नियममनुरुन्धानाः सौम्यकाशीतः श्रीगङ्गोत्तरीं प्रति प्रस्थितवन्तः । अयं जनोऽपि बहु-कालादारभ्य गङ्गोत्तरीं गन्तुं तत्र किञ्चिदनेहोऽतिवाहयितुं चाभि-लाषुक आसीत् । महान्तं पुण्यपरिपाकमन्तरेण तादृशस्य पुण्यसङ्क-ल्पस्य पूर्तिर्न सम्भवत्येव । तथा च पूर्वसुकृतनिचयपरिपाकेनाम्बायाः कृपया च गङ्गोत्तरीगमनायाहमपि निष्प्रतिबन्धतया समर्थोऽभवम-स्मिन्नब्दे । अविलम्बितमेव गङ्गोत्तरीं गत्वा तस्याः सेवनं श्रीगुरु-

भगवतां सङ्गतिश्चान्तर्यामिणोऽनुग्रहेण कर्तुमारभेस्म । श्रीस्वामिपादानां सविध एवोत्तरकाश्यामुद्देशतोऽष्टवर्षेभ्य आरभ्य विविधानां वेदान्तग्रन्थानामध्ययनं कुर्वन्तो वर्तामहे वयम् । सटीकशाङ्करभाष्यसहितस्य बृहदारण्यकस्य श्रीब्रह्मसूत्रस्य च तेषां सविध एवाध्ययनं मया कृतम् । संस्कृतभाषापरिशीलनादिकञ्च विशेषतस्तेषां द्वारेणैव तत्र मया कृतमासीत् । अहोखलु विद्वज्जनानां सङ्गमाहात्म्यम् ।

यथोक्तम्—"काचः काञ्चनसंसर्गाद् धत्ते मारकतीं द्युतिम् ।
तद्वत्सज्जनसंसर्गान्मूर्खो याति प्रवीणताम् ॥" इति ।

एतादृशेन श्रीस्वामिनां सङ्गमाहात्म्येनातुलितकृपया च भागीरथ्या, भक्तिज्ञानात्मकं विषयद्वयं विषयीकृत्यान्यदपि प्रकरणद्वयं गङ्गोत्तर्य्यां प्रतिदिनं किञ्चित् किञ्चिदिव विलिख्य सम्पादयन्नासीदयं जनः ।

अथ पतितपावनी पुराणप्रसिद्धा श्रीगङ्गोत्तरीभूमिश्चैतद्ग्रन्थविलेखने ममातिमात्रमुपकारिण्यासीदिति विशेषतो वक्तव्यं प्रतिभाति । सर्वदा पवित्रतराणां भावानां समुत्पादनेऽस्या भूमेः सामर्थ्यमनितरसाधारणमित्यनुभवसिद्धोऽयमंशः । सत्यमुक्तं श्रीस्वामिपादैः श्रीगङ्गोत्तरीक्षेत्रमाहात्म्यप्रस्तावनायाम् :—

"अथ किंलक्षणकं पवित्रं क्षेत्रमित्याकाङ्क्षायामिदं वदामो यदकृच्छ्रेणैव पवित्रभावभावकत्वं तल्लक्षणमिति ।" इत्यतिचञ्चलाऽपवित्रा मनोगतिरपि स्वरसेनात्रातिनिश्चलातिपवित्रा च सम्पद्यते । आत्माभिमुख्यात्मरतिश्च भवत्यनायासेन । अनवरतमुपश्रूयमाणः श्रीगङ्गायाः प्रणवध्वनिः सर्वानप्यनात्मभावान् सहसा तत्र निरुणद्धि । किञ्च परिपूतममरदुर्लभममरसरितोऽमृतमयं जलमपि स्नानपानाभ्यां तदुपसेवमानस्य शारीरिकं मानसिकञ्च मालिन्यमशेषतोऽपमार्जयति सद्य एव । अहो ? ऋषिसङ्घजुष्टायाः श्रीभगीरथतपोभुवः श्रीगङ्गोत्तरधरण्या अध्यात्मभावप्रसारणमाहात्म्यम् ।

एवं तीर्थानामपि तीर्थस्य पुण्यभूमेः श्रीगङ्गोत्तर्या अध्यात्ममाहात्म्यमतितरामन्वग्रहीत् पुण्यभावप्रजननेनेमंजनमिति मन्ये धन्यमात्मानमिमं ग्रन्थञ्च । एवं क्रमशः कतिचिद्दिनेषु प्रकरणद्वयमप्यत्र गङ्गोत्तर्यां समाप्तिमगमत् । अथचैवं प्रकरणत्रयस्य प्रणयनानन्तरं केवलं बुद्धिविनोदाय सङ्कलितस्याप्यस्य यदि ग्रन्थरूपेण प्रकाशनं क्रियते तर्हि मुमुक्षुजनानामवश्यं महानुपकारः कृतः स्यादिति बहूनां महात्मनामादेशमनुसृत्यैवमस्य प्रकाशनार्थं प्रयत्नः कृतो मया ।

अथ महामहोपाध्याय पं० हरिहरकृपालुद्विवेदिनस्तनूजो न्यायव्याकरणसाहित्याचार्यः पं० श्री ब्रह्मदत्तद्विवेदी (प्रिंसिपल संस्कृतकौलेज पटना) ग्रन्थस्यास्य संशोधनादिकार्यं सहर्षमकरोदिति तस्मै सह शुभाशंसया सहस्रशो धन्यवादा दीयन्ते ।

प्रकाशयित्रे श्रेष्ठिश्रीलक्ष्मीनारायणमहोदयाय च शुभाशीर्वचनमुपहृत्याहं प्रहृष्यामि ।


अत्रचाज्ञानेनवाऽनवधानतया वा यदि शाब्दिकमार्थिकं वा किमपि स्खलितं प्रयुक्तमुपलभ्यते, तर्हीयं बालकरचनेति मत्वा——

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥

इतिन्यायमनुसृत्य च विद्वांसस्तत् क्षन्तुमर्हन्तीति शम् ।

साधुजन—
चरणचञ्चरीकस्य
स्वामिन आत्मानन्दस्य

श्रीगङ्गोत्तरी
२०-८-३८



श्रीमान् सेठ लक्ष्मीनारायणजी जालान (पटना सिटी)

श्रीः

वक्तव्यम्

विविधाधिव्याधिनिधानेऽस्मिन्नसारे संसारे बम्भ्रम्यमाणा बहुविधाः प्राणिनो बाहुल्येन दुःखमनुभवन्तो निरतिशयसुखावाप्तये विचेष्टमाना विलोक्यन्ते ।

तत्र मूढाः संसारिण आत्मनोऽशेषां प्रवृत्तिं श्रेयसां मूलमिति मन्वानाः पुत्रकलत्रादीन् सुखमूलतयाऽध्यवस्यन्तस्तानुपादाय तेष्वेव सज्जन्ते । सक्ताश्च तत्रोत्तरोत्तरं प्रभूताशया प्रयतमाना अमन्दानन्दसन्दोहमासादयितुं वाञ्छन्ति । परं तेषां सुखसाधनत्वेनाभिमतानां विषयजातानां निरतिशयसुखासाधकत्वेन "विषसम्पृक्तान्नभोजनवत्" दुःखानुषक्तनश्वरतोषाधायकतया च न वस्तुतस्तदुपायभूतत्वमिति नाविदितं तदनुभविनाम् । अत आध्यात्मिकाधिभौतिकाधिदैविकरूपत्रिविधदुःखापाकरणमुखेन निरतिशयसुखसाधकोपायः सर्वथाऽपेक्षितः । प्राप्य चेमां कर्मभूमिं यो न तदुपा-

यमन्विष्यति तस्योपालम्भवचनं श्रूयते तथाहि:—

स्थाल्यां वैदूर्यमय्यां पचति
तिलकणांश्चान्दनैरिन्धनोघैः
सौवर्णैर्लाङ्गलाग्रैर्निखनति
वसुधामर्कमूलस्य हेतोः ।
छित्वा कर्पूरखण्डान् वृतिमिह
कुरुते कोद्रवाणां समन्तात्
प्राप्येमां कर्मभूमिं न चरति
मनुजो यस्तपो मन्दभाग्यः ॥

तपःपदमात्यन्तिकदुःखोच्छित्तिसाधनपरम् । तेषूपायेष्वात्यन्तिकदुःखनिवृत्तिरूपमोक्षप्राप्त्युपायभूतात्मदर्शनस्यैव सकलसम्मततया तदुत्पिपादयिषया पूर्वे आचार्या अखिललोकानुजिघृक्षया सङ्ख्यातीतान् विस्तृतान् ग्रन्थान् यथाधिकारि व्यरचयन् । ते च ग्रन्था व्याख्यानोपव्याख्यानैः पल्लविताः न सारल्येन सुकुमारमतीनामपेक्षितार्थसाधका इति निपुणं निरूप्य देशकालपात्रानुरूपमतिसङ्क्षिप्तं "चित्तसम्बोधनं" नाम ग्रन्थरत्नं मधुरैर्भावपूर्णैर्हृदयग्राहिभिः सारभूतैर्वचनैः सङ्ग्रथ्य निखिललोकोपकृतये प्राकाश्यं नीतम् ।

अस्मिन् ग्रन्थरत्ने उत्पत्तिक्रमेण वैराग्य–भक्ति–ज्ञानेतिनामधेयानि त्रीणि प्रकरणानि सन्ति सन्निवेशितानि ।

प्रकरणानामन्वर्थनामतया प्रतिपिपादयिषितोऽर्थः स्फुटमवगम्यत इति न पुनरुक्तिभिया विशिष्य प्रतिबोध्यते ।

वैराग्यप्रकरणे मृदुलैर्वचनैः स्त्रीसुतादीनामनर्थकारणत्वमतीव सरलपद्धत्या प्रतिपादितम् । "दर्शनाद्धरते" इत्यादिपद्यमुदाहृत्य विषयोऽतीवसुबोधतां नीतः । भक्तिप्रकरणे भक्तेः स्वरूपं साधु साधुभिर्विवेचितम् । त्यागविषयं विचारयतां तेषां परं पाण्डित्यं प्रतीयते । ज्ञानप्रकरणे आराध्यचरणस्य गुरोः मुक्तेश्च स्वरूपं मुमुक्षूणां कर्मत्यागो युज्यते नवेति च विवेचयतां विशेषेण वैदुष्यं पश्यामि ।

मधुररुचिरपदविन्यासैर्दुर्निवारज्ञानप्रसरैरपि यो दुरूहो विषयविशेषः सङ्कलितः स्वामिपादैः स सर्वथाऽनितरसुलभ इति सुनिश्चितं वचः ।

गम्भीरतरस्यास्य विषयस्य तथा सरलया दिशा सुनिरूपणमाकलय्य कस्य सचेतसश्चेतो न चित्रीयते । असम्भवोऽपि सम्भवो भवेऽस्मिन् प्रभूततपःप्रभावैः कर्तुं शक्य इति प्रमाणीभवति ।

ग्रन्थस्यास्य प्रणेता निरभिमानः शान्तस्वान्तः आत्मानन्द आत्मानन्दनामा स्वामिप्रवरः विषयजातात् विरज्य तपोमूर्तीनां स्वनामधन्यानामाल्लवावेति नामतः प्रसिद्धिमुपगतानां श्री १०८ परमहंसस्वामियोगानन्दमहोदयानां चरणौ शुश्रूषुस्तदीयशिष्यभावं स्वीकृत्य उत्तरकाशीक्षेत्रे त्यागेन तपसा ज्ञानेन च नित्यशुद्धबुद्धमुक्तस्वभावानवच्छिन्नानन्दोदासीनचैतन्यैकरसं साक्षात्कृत्य जीवनमुक्तेर्विलक्षणसुखाय प्रयतमानो विराजते ।

सच विधिविधेयबलात् भ्रमणप्रसङ्गे पाटलिपुत्रमुपागतो ग्रन्थस्यास्य संशोधनभारग्रहणाय मां समादिशत् । आदिष्टोऽहं तादृशयोग्यतावैकल्यादवकाशवैधुर्याच्चाशक्यमिदमिति चिरं चिन्तयन् स्वामिपादानां वचनभङ्गोऽनभ्यासमित्य इत्यवदधत् तदाशीर्दत्तहस्तावलम्बोऽत्रप्रावर्तिषि प्रकाशनकार्ये सम्विदानोऽपि काठिन्यम् ।

प्रायेण चित्तं सम्बोध्यैवाशेषोऽभिधेयार्थोऽभ्यधायि स्वामिपादैरिति नपुंसकलिङ्गेन तदुचितविशेषणविशेष्ययोर्निर्देशो बहुत्र कृतः । यत्र कुत्रचिदुपलभ्यमानं लिङ्गान्तरं तदुचितं शब्दं परामृश्य संयोजनीयम्। सौकर्येण दुरधिगमविषयावगमाय शब्दार्थयोः पौनःपुन्येन ग्रहणं न दोषाय । स्फुटप्रतिपत्तये सन्धिविच्छेदोऽपि क्वचित् कृत एव ।

मुद्रणे दोषाः पुरुषस्वाभाविकधर्मतया न सुपरिहरा इत्यवश्यं भाविनस्ते समभूवन्नेव ये पुनरञ्जसा दूरीकर्तुं शक्याः। सर्वथा व्यवहर्तव्ये कुतोऽह्यवचनीयतेत्यनुभूतिमूलकं वचनमनुस्मृत्य क्षन्तव्यमिति प्रार्थयते।

विदुषामाश्रवो

ब्रह्मदत्त द्विवेदी

व्याकरणभूषणो न्यायव्याकरणसाहित्याचार्यः

प्रधानाध्यापकः—

रामनिरञ्जनदास मुरारका महाविद्यालयस्य

पटना सिटी

श्रीसाम्बशिवाय नमः ॥

॥ वाङ्मुखम् ॥

परमात्मा प्रतिसृष्टि लोकानुद्दिधीर्षुश्चतस्रो वेदसंहिता आविष्कुर्वन् विराजते ता अङ्गप्रत्यङ्गाद्युपबृंहिताश्च विदधाति । अत्र कारणं तस्य कारुण्यम् । महर्षिशाण्डिल्येन स्वसूत्रे समुक्तं "मुख्यं हि तस्य कारुण्यम्" । लौकिकविषयेषु प्राणिनां स्वाभाविकी प्रवृत्तिस्तत्र नास्ति शास्त्रापेक्षा । पारलौकिकचिन्ता च विरला । तत्र प्रायशो मानवा न प्रसज्जन्ते । तदर्थं शास्त्रज्ञानमावश्यकम् । तच्च कठिनायाससाध्यम् । स्वल्पे लोकाः प्रयतितुं समर्थयन्ते । सरलेन सङ्क्षेपेण च रूपेण तच्चिन्तनं भवितुमर्हति । सर्वशास्त्रसारभूतं पद्धतित्रयं कर्मज्ञानभक्तिरूपं समीचीनं विभाति । भक्तिः कार्यादिसाध्यत्वात् कर्मान्तर्गता । अतोऽस्मिन् ग्रन्थे न तस्य पार्थक्येन विचारणा । भक्तिज्ञानवैराग्याणां वर्णनं माधुर्यप्रसादगुणशालि सुकुमारमतीनामपि ग्रहणयोग्यमत्रास्ते ।

एतद्ग्रन्थपठने प्रेक्षावतां मनुजानां चित्तमाकृष्टमिव वशीभूतमिव जायते । ज्ञानवैराग्यप्रकरणे दुरूहे अपि प्रतिपादनशैल्या पाठकानां कृते सुखसम्वेद्यतां सम्पादयतः ।

भक्तिकाण्डं मनोहरति कोविदकलापानाम् । जानन्ति वैयाकरणा यद्भक्तशब्दे भजधातोः कर्मणि "क्त" प्रत्ययोऽस्ति ।



महामहोपाध्याय पं० सकलनारायणजी पाण्डेय,
काव्य-सांख्य व्याकरणतीर्थ (कलकत्ता यूनिवर्सिटी
के लेक्चरर और संस्कृत कालेज के प्रोफेसर)

तस्यार्थो निष्पद्यते सेवित इति। नैव सेवक इति वाच्यं भवति। यमौरसपुत्रादिवत् परमात्मा सेवते स वै भक्तः परब्रह्मप्राप्तभक्तिकाः स्वप्रयत्नलब्धभक्तिकाश्चोभयेऽपि तन्मूर्तयः। केऽपि भक्ताः नावमन्तव्याः। केवलं नामकीर्तनशीला अपि ब्रह्मवादिनो भवन्ति—"कस्य चारु नाम मनामहे।" ऋग्वेदः "य एनं नाम्ना विदुः ब्रह्मवादिनो भवन्ति" (तैतिरीयारण्यकम्) तदर्पणाखिलाचारता तद्विस्मरणे परमव्याकुलतेतिनारदसूत्रोक्तभक्तिं दधानाः शरणप्रयत्ना इत्युच्यन्ते। तेषां सर्वं कृत्यजातं परमेश्वर एव निष्पादयति। ते च जायन्तेऽङ्कस्थितबाला इव प्रमोदमानाः। एतद्वृत्तं दर्शनशास्त्रानुशीलनलब्धानुभवेन ग्रन्थकारेण श्रीस्वामिनोपन्यस्तं यत् "भगवानपि भक्तस्य भक्तः" ज्ञानप्रकरणं पुस्तकप्रणेतुर्महात्मनो वैदुष्यमुद्घोषयति। ईश्वरानुग्रहं विना कोऽपि तदवबोधं न कारयितुं शक्नोति। एतत् प्रकरणं दर्शनप्रेमिभिरवश्यं पठनीयम्। श्रद्धाभाजनं भक्तप्रवरं स्वामिनं वन्दमानोऽपि न प्रहृष्यामि तत्कल्याणञ्चेश्वरतः प्रार्थयेऽहम्।

महामहोपाध्यायः

पं० सकलनारायण शर्मा


काव्यव्याकरणसाङ्ख्यतीर्थः

श्रीः

वन्दे कुन्देन्दुधवलदन्तभिन्नान्तरायकम् ।
दानधारापतद्भृङ्गसङ्गतं कुञ्जराननम् ॥

इदानीं कलियुगावेशवशात् खिलीभूते वेदादिसच्छास्त्रप्रवाहे, कलुषीकृते च मनुजचेतसि, विरलीभूते च गुरुशिष्यपारम्पर्ये, कान्दिशीके च जनसमाजे, कामलोभाद्यभिभूते च शास्त्रचिन्तकचेतसि, को वा कमुपदिशेत्, को वा किं शृणुयात्? शिष्यचित्तसन्तापहारका गुरवो विरलाः, शिष्यवित्तापहारकास्तु बहवः। ये किल "निर्मूलितविषयाशा निस्त्रैगुण्यात्मरमणबद्धाशाः शारीभवद्दशाशा शान्ता भुवि शेरते गलत्पाशाः" त एव हि परानुपदेष्टुमर्हाः। भारतभूमेरयमखण्डितो महिमा यदेतादृशा गुरवो विरला अपि न सर्वथोच्छिन्नाः, नैतेषां समुत्सादो भारतभूमौ सम्भवति। यतः—"तारकस्योपदेशेन गुरुर्भूत्वा विमुक्तिदः। काश्यामपीश्वरस्तस्मादीश्वरादधिको गुरुः॥" यस्य महिमा खलु ईश्वरमहिमानमप्यतिशेते, न तस्य समुत्सादः कथमपि भवितुमर्हति भारतेवर्षे।

श्रीमद्भिर्महाभागैरात्मानन्दस्वामिभिर्विरचितं वैराग्य–भक्ति–ज्ञानोपदेशात्मकं चित्तसम्बोधनाख्यं निबन्धमालोच्य स एव विश्वासो दृढतरो जायते यत्—तादृशो धरणीतलपावना महान्तो नेदानीमपि



श्री योगेन्द्रनाथ शर्मा महामहोपाध्याय
तर्क सांख्य वेदान्ततीर्थ
राजकीय संस्कृत महाविद्यालयाध्यापकश्च (कलकत्ता)

विलुप्ताः । एतेषां महभागानामलङ्कारभारविधुराऽपि हृदयहारिणी शब्दजालैरजटिलाऽपि सुप्रसन्ना विषयवासितचेतसामपि चेतांसि प्रक्षालयन्ती केषां न बहुमता भारती । निबन्धेऽस्मिन् पाण्डित्यप्रख्यापनप्रयासलेशोऽपि नास्तीति महद्गौरवं निबन्धॄणाम् । विकरालेऽस्मिन् कालेकालेऽविद्धकर्णा वधिरा एव प्रायेण जनाः, के वा तादृशा दयालवो ये सदुपदेशामृतेन तान् श्रोत्रलाभफलं प्रापयेयुः । को वा—"सर्वतः परिधावन्तं मनोमत्तमतङ्गजम् । ज्ञानाङ्कुशवशं नीत्वा पुनः पन्थानमानयेत् ॥" निबन्धमिमं निर्माय दयालुभिर्महाभागैर्महदुपकृतम् । एतस्य परिशीलनमजलमान्तरं स्नानमिति निश्चयो मादृशानाम् । रहस्यमपरिज्ञाय साधनान्यनुतिष्ठतामपि फलं फल्गु यथा—"मत्स्यःस्नानपरः फणिः पवनभुङ्मेषस्तु पर्णाशन" इति न्यायेनानुतिष्ठतामपि शुभं कर्म न फलाय स्यादिति कर्मणां वैराग्ये तस्य भक्तौ तस्याश्च ज्ञाने पर्यवसानं प्रतिपादयन्तो निबन्धारो महाभागाः सर्वेषामेव श्रद्धेया अकारणबान्धवाश्चेति विश्वासोऽस्माकम् ।

महामहोपाध्यायः

श्रीयोगेन्द्रनाथशर्मा


तर्कवेदान्तसांख्यतीर्थः

राजकीयसंस्कृतमहाविद्यालयाध्यापकश्च कलकत्ता

श्रीः

देशकालपात्राण्येवानुसरन्ति सर्वाणि कार्याणि । तत्रापि पात्रस्यैवातिप्रधानत्वे न कस्यापि सदसद्विवेकिनो विदुषो वैमत्यम् । पात्रवैकल्पप्रयुक्तमेव सिद्ध्यभावमाधुनिका अपि समुद्गिरन्ति देशोपकारकरणैकतानाः । अद्यावधि ये ते यावन्तोऽपि निबन्धाः निःश्रेयससाधनौपयिकीभूता लभ्यन्ते, ते सर्वेऽपि कुटिलकरालकलिकालाजगरनिगीर्णानां नष्टचेतनानां जनानामिदानीन्तनानां बोधवैधुर्य्यादेव पात्राणां न साधयन्ति समीहितमिति सुचिरं सुनिपुणं विविच्यैव सूक्ष्मेक्षिकया सम्यङ्निरीक्ष्यैव च यावद्दुर्बोधव्यपायक्षमं षड्वर्गभीषणभुजङ्गमवनीभूतायामज्ञानान्धकारसमाच्छादितायामस्यां जगत्यां दीपस्थाने तड़िद्दीप इव मणिस्थाने महामणिरिव परमकारुणिकेनात्मबोधैकरसेन शुभोदयेन श्रीयुतात्मानन्दमहोदयेन सङ्क्षिप्तमपि विस्तृतविवरणमिव सारल्यादनायासेन बोधसाधकं ग्रन्थरत्नं चित्तसम्बोधनं नाम निरमायि । यत्र खेलन्तोऽप्यनायासेन श्रुत्वैव तादृशदुर्ज्ञेयं दुर्निवारज्ञानप्रसरैरपि दुरधिगममुपनिषत्सारसर्वस्वभूतं विषयमधिगमिष्यन्तीति किम्बहुना ।

पं० रघुनन्दन त्रिपाठी
व्याकरणोपाध्यायः । साहित्यतीर्थः
कल्याणपुरम् , गया




श्री १०८ श्री स्वामी सतगुरुदेव हरीदासजी उदासीन

चित्तसम्बोधने-
विषयसूची

वैराग्यप्रकरणम्—

भक्तिप्रकरणम्—

ज्ञानप्रकरणम्



श्री १०८ श्रोत्रिय ब्रह्मनिष्ट स्वामी देवगिरीजी सरस्वती "उत्तरकाशी'

चित्तसंबोधनम्

मङ्गलाचरणम्।

स जयति सिन्धुरवदनो
देवो यत्पादपङ्कजस्मरणम्।
वासरमणिरिव तमसां
राशिं नाशयति विघ्नानाम्॥ १॥

वारिदाभं गले गङ्गावारिगौरं कलेवरे।
वारणाद्रिपतिं वन्दे वारणाजिनवाससम्॥ २॥

गङ्गे मातरनुस्मरामि सततं
त्वन्मूर्त्तिमत्यद्भुतां
दैवीं दैवतदुर्लभाञ्च यमुना-
वागन्नपूर्णादिकम् ।

भक्तेनाथ भगीरथेन भगवत्-
पादैश्च पादार्चकै-
र्या नित्यं समुपाश्रिता विजयते
गङ्गोत्तरीसद्मानि ॥ ३ ॥

भगवत्पादपादाब्जद्वन्द्वन्द्वन्द्वनिवर्हणम् ।
सुरेश्वरादिसद्भृङ्गैरवलम्बितमाभजे ॥ ४ ॥

दीक्षागुरुं नमस्कृत्य दक्षान् विद्यागुरूँस्तथा ।
किञ्चिच्चर्चाङ्करिष्येऽहं किञ्चिज्ज्ञोऽन्तस्सुखाय मे ॥ ५ ॥

सदाशिव



नमः शिवाय निःशेषक्लेशप्रशमशालिने । त्रिगुणग्रन्थिदुर्भेद्यभवबन्धविभेदिने ॥

GITA PRESS.GORAKHPUR.

No. 1031.

श्रीविश्वनाथाय नमः

ॐ श्रीगङ्गायै नमः

वैराग्यप्रकरणम्

भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद्भयं
मौने दैन्यभयं बले रिपुभयं रूपे जराया भयम्।
शास्त्रे वादभयं गुणे खलभयं काये कृतान्ताद्भयं
सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयम्॥

"वैराग्यशतकम्"

यच्च काम सुखं लोके यच्च दिव्यं महत्सुखम्।
तृषणाक्षयसुखस्यैते नार्हतः षोडशीं कलाम्॥

"शान्तिपर्व"

रेचित्त! कुत्र धावसि। वैराग्यं भज। चिन्तां त्यज। विश्रान्तिं व्रज। सर्वे विषयाः सातिशयाः; सर्वे विषयाः क्षणभङ्गुराः; सर्वे विषयाः दुःखप्रदा बन्धकाश्चेति

नितरां निश्चिनु । विषगर्भितमोदकोपमास्त इति जानीहि । एवं विषयेषु दोषान् पश्य । दोषान् दृष्ट्वा तानशेषतस्त्यज । तत्र तृष्णामुत्पाटय । तृष्णायाः फलं दुःखमेवेति विजानीहि । तृष्णा न कदाऽपि सुखहेतुर्भवति । तस्माद्विषयगर्तेषु मा पप्तः । मोहनिद्रातो जागृहि; जागृहि । अवहितो भव, तृष्णाक्षय एव सुखहेतुरिति विद्धि । वितृष्णस्य यत्सुखं तत्सुखं नरराजस्य नास्ति तत्सुखं सुरराजस्य नास्ति, किमाधिकं ? हिरण्यगर्भस्याऽपि नास्ति तस्माद्वितृष्णो भव । विषयान् विषवत् परित्यज । त्यक्त्वा च सुखी भव ।

उक्तं हि—

"विषं विषयवैषम्यं न विषं विषमुच्यते ।
जन्मान्तरघ्ना विषया एकदेहहरं विषम् ॥
यान्येतानि दुःखानि दुर्जराण्युन्नतानि च ।
तृष्णावल्याः फलानीह तानि दुःखानि राघव ! ॥
यावती यावती जन्तोरिच्छोदेति यथा यथा ।
तावती तावती दुःखबीजमुष्टिः प्ररोहति ॥" इति ।

"वासिष्ठम्"

"नात्यक्त्वा सुखमाप्नोति नात्यक्त्वा विन्दते परम्।
नात्यक्त्वा चाभयः शेते त्यक्त्वा सर्वं सुखी भवेत्॥" इति
"शान्तिपर्व"

रे मनः! धनादिषु तृष्णां कृत्वा किमर्थं ग्रहाविष्टवदितस्ततः परिभ्रमसि। रे मूढ! धनतृष्णां जहीहि। धनस्योपार्जने दुःखं धनस्य रक्षणे दुःखं नाशे दुःखं व्यये दुःखमिति धनं दुःखभाजनं विद्धि। धनं महापातकानां निदानमिति विद्धि। धनेन कामो जायते। धनेन क्रोधो जायते। धनेन महान् गर्वो जायते। धनेनैव लोभमोहादयोऽपि जायन्ते। अहो! धनस्य दौरात्म्यम्। तादृशे धने त्वं किं शोभनं पश्यसि।

तदुक्तम्—

"अर्थमनर्थं भावय नित्यं,
नास्ति ततः सुखलेशः सत्यम्।
पुत्रादपि धनभाजां भीतिः,
सर्वत्रैषा विहिता नीतिः॥" इति

"द्वादशपञ्जरिका"

हन्त ! हन्त ! धनमदरूपिणा महारोगेण समाक्रान्तस्य पुरुषस्य महतीं दुरवस्थां वर्णयति कश्चन कविः—

"बधिरयति कर्णविवरं
वाचं मूकयति नयनमन्धयति ।
विकृतयति गात्रयष्टिं
सम्पद्रोगोऽयमद्भुतो राजन् ! ॥" इति

"सुभाषितरत्नाकरः"

अहो शृणु ! धनिनो दौरवस्थ्यमन्यदपि । धनिनो हन्त राजतो भयं; धनिनश्चोरतो भयं; धनिनः पुत्रतोभयं धनिनो बन्धुतो भयम् । हन्त ! हन्त ! सर्वेभ्यस्तस्य सर्वदा भयमेव भवति। अतश्च सुखेन निद्रातुमपि न लक्ष्मीवान् प्रभवति। अहो ! धन्यं धन्यं दारिद्र्यमिति जानीहि। धन्याः खलु ते दरिद्राः, ये निश्चिन्ता निर्भयं निद्रासुखमुपभुञ्जते । विविधचिन्ताव्याकुलतया निरयी जन्तुरिव कष्टतराणि क्लिष्टतराणि च दिनानि धनी कृच्छ्रेणातिवाहयति । तादृशे धनित्वेऽतिमात्रजुगुप्सिते त्वं किं शोभनं पश्यसि।

अथ च लक्ष्मीः कुलटेव पुरुषात्पुरुषान्तरमनुधावति ।

सा तडिदिव दीपशिखेव चातीव चञ्चला। न तस्याः कश्चित् प्रियो भवति। सा गौररण्ये तृणमिव नवं नवं प्रार्थयति पुरुषम्। एष तस्याः स्वभावः। तथाऽपि मूढास्तां स्थिरीकर्तुमिच्छन्ति; ममेति स्वकीयां कर्तुमिच्छन्ति। ते सुरसरित्स्रोत ऊर्द्ध्वं प्रवाहयितुमिवेच्छन्ति। लक्ष्मीः, न कस्याऽपि कदाऽपि स्वकीया भवति, न दासी भवति। सर्वेऽपि तस्या दासा भवन्ति।

तदुक्तं महाभारते—

"अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित्।"इति

रे मूढ! विचारं कुरु। विवेकी भव। धनाशां त्यक्त्वा स्वस्थः सुखी भव।

एवं स्त्रीसुतादिष्वपि रतिं ममताञ्च परित्यज। नारी नरकाग्नीनामिन्धनमिति जानीहि। कामिनीशरीरे किं शोभनं परिपश्यसि? कामिनीशरीरं किं त्वं सुन्दरं सुखदं सुधानिष्यन्दि परिपश्यसि?। अहो! ते मोहमहिमा। सुन्दरश्चेत् करनखमुखादीनि कचकुचादीनि च पृथक्कृत्य तद्विलोकय। अस्पृश्यानि जुगुप्सितानि मांसास्थीनि तदा त्वं विलोकयिष्यसि।

"एक एव पदार्थस्तु त्रिधा भवति वीक्षितः ।
कुणपः कामिनी मांसं योगिभिः कविभिः श्वभिः ॥"
"लिङ्गपुराणम्"

इत्येतद्व्यासवचनमनुस्मर । कामकदर्थितदृष्टयो विण्मूत्रभाण्डमपि कामिनीशरीरं सुरुचिरं पश्यन्ति । काममदिरोन्मत्ताः कामिनीमनुधावन्ति । यथा कामुकास्तथा कामिन्योऽपि विण्मूत्रभाण्डं कामुकशरीरं सुरुचिरं पश्यन्ति । कामुकमनुधावन्ति च । एवं कामुककामिन्योः खरकण्डूयनन्यायेन पारस्परिकः क्रीडनादिव्यवहारः । हन्त ! अरे चेतः ! त्वं विवेचननिपुणमसि । विवेचय बाढम् । अहो ! इह लोके मोहस्य मूलं नारी, पापस्य मूलं नारी, दुःखस्य मूलं नारी । कलहस्य मूलं नारी, मरणस्य मूलं नारी, परलोके तु नरकस्य मूलं नारी । किमधिकोक्तेन । इहामुत्र च महानर्थपरम्पराया एकमूलमियं नारीति निश्चिनु । न सुधानिष्यन्दि किन्तु विषनिष्यन्दि तन्मुखमिति निश्चिनु । नारीं राक्षसीमिव भयङ्करीं जानीहि । यथोक्तम्:—

"दर्शनाद्धरते चित्तं स्पर्शनाद्धरते बलम् ।
सम्भोगाद्धरते वीर्यं नारी प्रत्यक्षराक्षसी ॥" इति
"दत्तात्रेयसंहिता"

विवेकनिश्चयाभावात्तादृशललनालालनलम्पटो लोकः परिभ्रमति भवान्। विवेकनिश्चये कृते न तथा स्यात् कदाऽपि। विवेकी न स्वप्नेऽपि ललनायाः क्रीडामर्कटतां गच्छति। सर्वमपि पारतन्त्र्यं सर्वोऽपि संसारः स्त्रीमूलकः। स्त्रीत्यागेन समग्रः संसारः सन्त्यक्तः स्यात्। तथा च स्वतन्त्रः सुखी च भवति पुरुषः। कामोन्मत्तानेव पुरुषान्नारी नर्तयति; न कामदोषरहितान्। कामुक एव नारीमुखं सुधाकुम्भमिव शरत्सुधाकिरणमिव वा मानिनीचरणसेवनं परमपुरुषार्थत्वेन च पश्यति। अहो! कामदुर्विलासः।

अथ च ललनाचित्तमतिलोलं न कस्मिंश्चिदपि पुरुषेऽव्यभिचारितया रममाणं दृश्यते। त्वं तु मूर्खशिखामणिः "इयं मम प्रिया मय्येव प्रेम कुरुते, करिष्यते च नान्यत्रे"त्यभिमन्यसे।

"नस्त्रियामप्रियः कश्चित् प्रियो वाऽपि न विद्यते।

इति हि मुनयो महान्तो गायन्ति।

स्त्रीजनेन वञ्चिताः प्राचीनाः पुरूरवःप्रमुखा अर्वाचीना भर्तृहरिप्रभृतयश्च बहवो महन्नैराश्यमनुतापञ्चोपगता इति

चेतिहासप्रसिद्धम् । ततस्तस्मिन् विस्रम्भं कदापि मा कार्षीः । न केवलं कामिनी पुत्रादयो बन्धुवर्गश्च यावत् त्वं सुरूपवान् गुणवानैश्वर्यवाँश्च भवास; तावत् त्वयि स्वप्रयोजनाय महत्प्रेम प्रकटयन्ति । स्वप्रयोजनाभावे तु मृतशरीरादिव त्वत्तस्ते सर्वे बिभ्यति । त्वां स्पर्ष्टुमपि ते नेच्छन्ति । तव निकटेऽपि ते नाऽऽगच्छन्ति । पुत्रः पुत्री च, भ्राता भगिनी च, बन्धुर्मित्रादिश्च सर्वः स्वार्थरतः । स्वार्थभङ्गे तु न पुत्रः पुत्रः, न पुत्री पुत्री च, न भ्राता भ्राता च न भगिनी भगिनी च न बान्धवादिर्बान्धवादिश्च भवति । अहो ! स्वार्थवैभवविजृम्भणम् ।

तदुक्तम्:—

"यावद्वित्तोपार्जनसक्त स्तावन्निजपरिवारो रक्तः ।
पश्चाद्धावति जर्जरदेहे वार्तां पृच्छति कोऽपि न गेहे॥"

"चर्पटपञ्जरिका"

तादृशे नारीजने, पुत्रपौत्रादिषु, बन्धुवर्गे चातिमात्रमनुरक्तः सन् तेषां क्षणमात्रवियोगमप्यसहमानो वर्तसे त्वम् । अहो ! महदिदमाश्चर्यम् । तव मोहमाहात्म्याय भूयोभूयो नमस्कारः ।

अथ चासुरी दैवीचेति नारी द्विविधा वर्तते। तत्रासुर्येवोक्तरीत्या पुरुषस्य सर्वानर्थहेतुरिति विद्धि। दैवी तु पुरुषस्य मोक्षहेतुः, यथाऽरुन्धतीचूडालाप्रभृतयो वसिष्ठशिखिध्वजप्रभृतीनाम्। तादृश्यो दिव्यगुणसम्पन्ना नार्यो न केवलं न पुरुषानर्थहेतुः किन्तु सर्वलोकपावनाः सर्वलोकवन्द्याश्चेति जानीहि। तादृशेभ्यो नारीजनेभ्यः शतशः प्रणामान् कुरु। न ते कथमपि दूषणाऽर्हाः किन्तु सर्वथा श्लाघनार्हा इति बुद्ध्यस्व। प्राक्कथितं सर्वमपि नारीदूषणमासुर्या न देव्या इति सुष्ठु विद्धि।

अथान्यच्च शृणु भो भ्रातः। पुत्रादयः पित्रादीनां न कथमपि सुखहेतवो दृष्टाः। सर्वथा दुःखहेतवो दृष्टाः। स्वस्याजन्मना जन्मना च पुत्रः पितरमनवरतमुद्वेजयति। ननु यत्किञ्चिद्वस्तु स्वस्याजन्ममात्रेणान्यस्य कस्यचित् क्लेशहेतुः कथं स्यादिति चेच्छ्रूयताम्। "हन्त! हन्त! एतावन्तः संवत्सरा अतीताः; न मे पुत्रमुखदर्शनसौख्यं सञ्जातमद्यावधि; हन्त! हन्त! हतभाग्योऽहं; मम जीवितेन किं प्रयोजन" मित्यादिभि र्बहुवचनैः पुत्रस्याजन्मना पुरुष आत्मानं भर्त्सयन् विलपंश्च दृश्यते। अथ

पुत्रः स्वजन्मनाऽपि पितरं दुःखयत्येव । बाल्ये रोगाद्यनर्थैरध्ययनवैमुख्यादिभिश्च यौवने च परदारगमनादिभिर्दुश्चेष्टितैरकालमरणादिभिश्च दुःखजनको जनकस्य पुत्रो दृष्टः । तस्मात्पुत्रादयः पितुः सुखकारणमिति बुद्धिरहो ! भ्रान्तिमात्रम् । इमां भ्रान्तिं निवर्तय । विचारपरो भव । पुत्रादिषु, कलत्रे च बन्धुबान्धवेषु चाऽऽसक्तो मा भूः । तेषु सर्वेषु वैराग्यमावह । वैराग्यजनितं महत्सुखमनुभव ।

रे चित्त ! यथा स्त्रीसुतादिषु तथाऽस्मिन् शरीरेऽपि विगतरागं भव । अस्मिन् कलेवरे किं शोभनं पश्यसि त्वम् । मांसास्थिसञ्चितमाधिव्याधिमन्दिरमिदं शोभनं चेदशोभनं किमस्ति वस्तुलोके । अशोभनानामप्यशोभनमिदं देहमिति जानीहि । एवं ज्ञात्वा तत्रासक्तिं परित्यज । यथोक्तमस्मद्गुरुभि र्दयालुभिः श्रीसौम्यकाशीशस्तोत्रे-

"मैथुनोत्थमतिमात्रकच्चरं
चात्रमूत्रकुहराद्विनिर्गतम् ।
गात्रमेतदसृगस्थिसञ्चितं
तत्र किं कुरु रतिं त्रिलोचने ॥"

अतिमात्रकुत्सितेऽप्यस्मिन्देहे देही महाविचक्षणोऽपि

निसर्गतः प्रीतिमान् वर्तते। अहो! अशुचौ शुचित्व-सम्पादिकाया अविद्याया विलासकौशलम् ।

देहगर्हापरमिदं शृणु श्रीकृष्णमुनिवचनम्—

"मांसासृक्पूयविण्मूत्रस्नायुमज्जाऽस्थिसंहतौ ।
देहे चेत्प्रीतिमान्मूढो भविता नरकेऽपि सः ॥ इति
"विष्णुपुराणम्"

स्वदेहाशुचिगन्धेन न विरज्येत यः पुमान् ।
वैराग्यकारणं तस्य किमन्यदुपदिश्यते ॥" इति च
"पद्मपुराणम्"

न केवलं विण्मूत्रपात्रत्वादेवेदं गर्हास्पदं, किन्तु क्षण-भङ्गुरत्वादपि । नलिनीदलगतं सलिलमिवात्यन्ततरलं जीवितम् ।

तदुक्तम्—

"चलपत्रान्तलग्नाम्बु बिन्दुवत्क्षणभङ्गुरम् ।
आयुस्त्यजत्यवेलायां कुस्तत्र प्रत्ययस्तव ॥" इति
अ० रा०

कदा इदं पतिष्यतीति कोऽपि न जानाति। कायो

न कस्याऽपि सुस्थायी दृष्टः । सर्वे ब्रह्मादयः शैलसमुद्रादयश्चये चेतनाचेतनेषु विशिष्टतमास्तेऽपिका- लवशतां गच्छन्ति । कालः सर्वं निगिरति । आयुः सर्वेषां जनिमतामामघटाम्बुवत् प्रतिक्षणं क्षरति । तव पुरत एव प्रतिदिनमनेकानि भूतानि सूर्यकिरणताप- सम्पर्केण हिममालेव विलयमुपगच्छन्ति दृश्यन्ते त्वया । तथाऽपि त्वं कालवेगं न पश्यसि, आत्मानमहो ! सुस्थिरं मन्यसे ।

सत्यमुक्तं मुनिचरणैः—

"अहन्यहनि भूतानि प्रविशन्ति यमालयम् ।
[1]शेषाः स्थावरमिच्छन्ति किमाश्चर्यमतः परम्॥"इति

"महाभारतम्"

अस्य कायस्य क्षणिकतां मत्वा, तत्र स्थिरताभिमा- नमुत्सृज । स्थिरताभिमानं महानर्थनिदानं जानीहि । तत्र सत्यत्वभ्रान्तिमपाकुरु । शैला अपि विशीर्यन्ते । धराऽपि वैधुर्यं याति । समुद्रा अपि शुष्यन्ति । तारका अपि शीर्यन्ते । सिद्धा अपि विनश्यन्ति । दानवा अपि

---

१. शेषाः संस्थातुमिच्छन्ति इत्यपि पाठान्तरम् ।

दीर्यन्ते। ध्रुवोऽप्यध्रुवं जीवति। अमरा अपि म्रियन्ते। शक्रोऽप्याक्रम्यते वक्रैः। यमोऽपि नियम्यते। वायुरप्यवायुत्वमेति। सोमोऽपि व्योमतां याति। मार्तण्डोऽपिखण्डतामेति। अग्निरपि मग्नतामेति। परमेष्ठ्यपि नाशवान् भवति। अजो हरिरपि ह्रियते। भवोऽप्यभावमायाति। कालोऽपि सङ्काल्यते। नियतिश्चाऽपि नीयते। अनन्तं खमप्याऽऽलीयते। स त्रिषु लोकेषु नास्ति योऽस्मिन्संसारे न बाध्यते। देवा दिवि, नरा भुवि, पाताले भोगिनश्चैते सर्वे जर्जरां दशां नीयन्ते। इति महाशक्ति सम्पन्ना महान्तो दिव्या अपि पदार्थाः कालवडवानलपातिन इति सर्वेषां कालग्रस्तता बहुवर्णिता भगवता वसिष्ठेन। तथाचेदहो! अस्य शरीरस्य कैवाऽऽस्था।

उक्तं च—

"**सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः।**
संयोगा विप्रयोगान्ता मरणान्तं हि जीवितम्॥" इति

"बृहदा० वार्तिकम्"

तथाचेदस्य स्थूलभूतनिचयरूपस्य सप्तधातुकस्य देहस्य कैवाऽऽस्था। एवं विविच्याऽस्मिन्नसारे करिकल-

भकर्णवच्चञ्चलतरे पुरीषपात्रे रतिं विहाय हरिपरायणो भव । सर्वेषु कनककान्तादिषु विषयेषु कलेवरे च विगततृष्णो भूत्वा निश्चिन्तो हरिं सततं चिन्तय । विषयमृगतृष्णिकापानार्थं तामनुधावतः पुरुषस्य हरिस्मरणकथा कथं स्यात् ? भोग्यत्यागेनाप्रकम्पो भूत्वा हरिचरणाम्बुजं भज । वैराग्यसुधासौधमधिरुह्य प्रोषितभर्तृका कान्तेव भर्तारं भगवन्तं ध्याय दिदृक्षस्व च ।

अथ विद्यासौन्दर्यसत्कुलतादिष्वप्यापातरमणीयेषु रम्यताबुद्धिं त्यज । तन्निमित्तकं गर्वमाकार्षीः । अल्पज्ञ एवाखर्वगर्वगजारूढः पश्यन्नप्यपश्यन्निव विचेष्टते, नाधिकज्ञः । तेष्वासक्तिरपि महतः क्लेशस्य बन्धस्य च कारणमिति विद्धि ।

किञ्च वाङ्मनसयोर्विग्लापनं विद्धि वाग्गुम्फानामधिकतरमध्ययनम् । वेदशास्त्रादिव्यसनमपि पुरुषं व्याकुलयति पुरुषं चञ्चलयति शोकगर्ते पातयति च ।

तदुक्तं श्रीविद्यारण्यमुनिवरेण्यैः—

"वेदाभ्यासात्पुरा तापत्रयमात्रेण शोकिता ।
पश्चात्त्वभ्यासविस्मारभङ्गगर्वैश्च शोकिता ॥" इति
"पञ्चदशी" ।

मलिना चेयं शास्त्रवासना पाठबहुशास्त्राध्ययनानुष्ठानव्यसनैस्त्रिधा वर्तत इति तैरेव विस्तरेण सदृष्टान्तमुपपादितमन्यत्र ।

दुःखदोषानुदर्शनेन निरर्थकपदपदार्थस्मरणादिरसिकतां निरस्य हरिचरणस्मरणरसिको भव । हरिचरणस्मरणमधुमत्तो भव ।

अभिजनाभिमानमपि मा कार्षीः । ब्राह्मण्याद्यभिमानोऽपि मदहेतुर्बन्धहेतुर्दुःखहेतुश्चेति विजानीहि । पूजाप्रतिष्ठारूपे महाजालकेऽपि मा पप्तः । मानस्तुतिप्रतिष्ठानां लिप्सा न कदापि कर्तव्या । स्वयं प्राप्तावपि श्रेयोविघातकत्वात् तत्रोपेक्षा कार्या ।

तदुक्तम् :—

"अभिमानः सुरापानं गौरवं घोररौरवम् ।
प्रतिष्ठा सूकरीविष्ठा त्रयं त्यक्त्वा सुखी भवेत् ॥" इति

एवं सर्वेषु विषयेषु मायामयेषु मूढजनमनोरञ्जकेषु रागं त्यक्त्वा सुखी भव । सर्वेषामपि भयक्रोधलोभादीनां दोषाणामेकं बीजं राग इति विद्धि । ततश्च रागत्यागेन सर्वे दोषाः सन्त्यक्ताः स्युः । प्रसादविरोधिनां रागादि-

दोषाणां हाने तु त्वं सुप्रसन्नो गङ्गासलिलवन्निर्मलो भविष्यसि। आशादास्यं दूरतः परित्यज।

उक्तं हि :—

"आशाया ये दासास्ते दासाः सर्वलोकस्य।
आशा येषां दासी तेषां दासायते लोकः॥" इति

"बृहन्नारदपुराणम्"

ननु विषयसेविनो विषयसेवातृष्णयाऽपि विषयभोगद्वारा वैषयिकं सुखमुपलभन्त एवेति चेदिदं शृणु भाष्यकार वचनम् :—

"इन्द्रियाणां हि विषयसेवा तृष्णातो निवृत्तिर्या तत् सुखम्। न विषयविषया तृष्णा दुःखमेवहि सा। न तृष्णायां सत्यां सुखस्य गन्धमात्रमप्युपपद्यते।" इति

"गीताभाष्यम्"

"आशा तु परमं दुःखं नैराश्यं परमं सुखम्" इति भाष्यकारवचनतात्पर्यम्। तथापि :—

"अहो चित्त! कथं भ्रान्तं प्रधावसि पिशाचवत्।"

अज्ञानेन विपत्समूहं गर्भितेषु शब्दादिषु विषयेषु तृष्णया कुरङ्गादिवत्पञ्चत्वं मा गमः ।

तदुक्तम् :—

शब्दादिभिः, पञ्चभिरेव पञ्च
पञ्चत्वमापुः स्वगुणेन बद्धाः ।
कुरङ्गमातङ्गपतङ्गमीन–
भृङ्गा, नरः पञ्चभिरञ्चितः किम् ॥ इति

"विवेकचूडामणिः"

रे चेतः! त्वं तु विवेकाधिकारि विवेकं कुरु। उपभोगेन कामानां कामस्य शान्तिर्न कदापि भवति। सहस्र-परिमितान् वत्सरान् कामानुपभुज्याऽपि ययातिर्न तृप्ति-मगमत् ।

"न जातुकामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मैव भूय एवाभिवर्धते ॥"

"भागवतम्"

इति हि ययातेर्वचनम् ।

तस्माद्विवेकेन कामं त्यज। तृप्तिं भज। उपभोगेन

कामस्तव वर्द्धिष्यते। विवेकसामर्थ्यादेव त्वमैहिकमामुष्मिकञ्च विषयजातं हिरण्यगर्भपदपर्यन्तं सर्वं काकविष्ठावन्मनसा सन्त्यज्य निर्वृत्तो भव।

ननु मनुजशरीरं तत्सम्बन्धि स्त्रीसुतादि च दुःखहेतुत्वेन त्याज्यमपि, देवादिशरीरमतिपुण्यकर्मफलभूतं कथं दुःखहेतुः कथञ्च त्याज्यमिति मा शङ्किष्ठाः। पुण्यकर्म तत्फलभूतञ्च देवादिदेहं न सुखहेतुर्भवति कथमपि। सुखहेतुरित्येतद्भ्रान्तिमात्रम्। पुण्यसमूहपरिपाकेन स्वर्गलोके निवसतां सुराणामपि न दुःखविमोचनम्। तेषामपि तत्र दुःखमेव, सातिशयत्वात्, रागद्वेषशोकमोहभयादिदोषदूषितत्वाच्च। तेषां तत्राधिकतरं सुखमपि विद्यत इतिचेन्न, तत्रत्यमपि सुखं मनुष्यलोकसुखवद्दुःखसम्मिश्रितत्वात् दुःखमेव विषसम्मिश्रितान्नवत्। तस्मात्पुण्यकर्म देवादिशरीरं वा नाऽऽत्यन्तिकसुखसाधनमिति सुदृढं बोद्धव्यम्। ततश्चामरावत्या आधिपत्यं, सत्यलोकस्य चाधिपत्यं दुःखहेतुरिति श्रेयःपथविघातकमिति निश्चित्य तृणवत् परित्यज। सर्वं त्यक्त्वा त्यागाभिमानमपि त्यज। सर्वं त्यक्त्वा यदि वैराग्याभिमानोऽवशिष्यते, सर्वत्यागस्तर्हि न विशेषतः किमपि फलं तव सम्पादयिष्यति। "अहं

विरक्तः कोऽन्योऽस्ति सदृशो मया" इत्ययमभिमानोऽनार्यजुष्टः पिशाचवत् तव निखिलमपि गुणजातमेकग्रासत आशु निगिरति। तस्माद्वैराग्यसम्पन्नोऽपि विनम्रो भव। वैराग्यसम्पन्मदमदिरां पीत्वा पीत्वा पुनःपीत्वा मत्तोन्मत्त प्रमत्तदशां जुगुप्सितां मागाः। स्त्रीसुतधनादित्यागेऽपि तत्त्यागाभिमानस्य त्यागो न कर्तुं शक्यते त्यागिभिरित्यहो! चित्रं! चित्रं! मोहवैभववैचित्र्यम्। अथाभिमानार्थं पूजाप्रतिष्ठार्थं वा पुत्रकलत्रादिकं विषयजातं ये परित्यजन्ति ते खलु तदनुरक्तेभ्यः प्राकृतेभ्योऽपि निकृष्टतरा इति बुद्ध्यस्व। विवेकवैराग्यभाक् त्वं दैवशरणः सन् चिन्ताविलापरहितो भव। भूतस्मृतिं दह। भाविचिन्तां जहि। भूतभाविचिन्ताभिस्त्वमात्मानं वृथा किमर्थं कदर्थयसि। यद्भूतं तद्भूतमेव। यच्च भावि तद्भविष्यत्येव। तत्र का चिन्ता। यद्यदागतं तत्तदपेक्षस्व। यद्यद्गतं तत्तदुपेक्षस्व। तत्र खेदनं मोदनं वा मा कार्षीः। सुखं मे भूयात्, दुःखं मे मा भूदिति चिन्तयाऽऽत्मानं मा व्यथय। यथाप्रारब्धं सर्वं भवति भविष्यति च। यथाप्रारब्धमायुर्व्यतिगमिष्यति। भावि खण्डनेन न खण्ड्यते। भावि मण्डनेन न मण्ड्यते च। हरिणाऽपि हरेणाऽपि

ललाटलिखिता लेखा परिमार्ष्टुं न शक्यते। अतो विधिर्बलवानिति निश्चिनु। अनुकूलं प्रतिकूलं वा विधिं विहन्तुं कः समर्थः। समृद्धिर्वा नाशोवा पुरुषस्य विधितन्त्र इति समाधेहि।

उक्तं हि:—

"अवश्यंभाविभावानां प्रतीकारो भवेद्यदि।
तदा दुःखैर्न लिप्येरन्नलरामयुधिष्ठिराः॥" इति

"पञ्चदशी"।

"हा राम हा मे रघुवंशनाथ,
जातोऽसि मे त्वं परतः परात्मा।
तथाऽपि दुःखं न जहाति मां वै,
विधिर्बलीयानिति मे मनीषा॥" इति च

अ० रा०

"रामे प्रव्रजनं बलेर्नियमनं पाण्डोः सुतानां वनं
वृष्णीनां निधनं नलस्य नृपते राज्यात्परिभ्रंशनम्।
कारागारनिषेवणं च मरणं सञ्चिन्त्य लङ्केश्वरे
सर्वः कालवशेन नश्यति नरः को वा परित्रायते॥"

इति च "भोजप्रबन्धः"

एवं समाधाय भूतभाविचिन्तां परित्यज्य वर्तमाने वर्तस्व। यथाकथञ्चित्कालं नय। अदृष्टेन यत्किञ्चिल्लभ्यते तत् खाद, चणकाः श्यामाकास्तण्डुलाः शाकाः पत्राणि वा।

यथोक्तं श्रीशङ्करभगवत्पूज्यपादैः—

"क्षुद् व्याधिश्च चिकित्स्यतां
प्रतिदिनं भिक्षौषधं भुज्यताम्।
स्वाद्वन्नं नतु याच्यतां
विधिवशात्प्राप्तेन सन्तुष्यताम्॥" इति

"साधनपञ्चकम्"

न किञ्चिल्लभ्यते चेदुदकं पिब। यत्किञ्चिद्वस्त्रमात्रं जीर्णमशोभनं कच्चरं खण्डितं वा यदृच्छया लब्धं तेनैव शरीरमाच्छादय। अथवा रथ्याचर्पटेन विरचितया कुकन्थया शीतबाधां बाधस्व। यद्वा वल्कलं दिग्वासो वा परिधेहि। अथचोटजः कुटीरो नदीपुलिनं श्मशानं वा वृक्षमूलं शून्यमन्दिरमारामो वा गुहा वा दैवेन यत्प्राप्तं तत्रैव कालं नय।

उक्तं हि श्रीभर्तृहरिणाऽपि :—

"कौपीनं शतखण्डजर्जरतरं कन्था पुनस्तादृशी ।
निश्चिन्तं सुखसाध्यभैक्ष्यमशनं शय्या श्मशाने वने"

इति "वैराग्यशतकम्"

शोभनेनान्नेन वस्त्रेण निवासेन वाऽस्य कुणपस्याराधनं मा कार्षीः । तदर्थं प्रयत्नवान्मा भूः । यदृच्छालाभसन्तुष्टो भव । शरीरनिर्वाहमेवं कुरु । गर्भे तव रक्षा येन कृता स परमात्मा इदानीमपि तव रक्षां करिष्यति । यदा तव दन्ता नासन् तदा तव हिताय यो दुग्धं मातुः स्तनयोररचयत् ; यदा तव दन्ता सञ्जातास्तदा त्वदर्थमन्नं यः प्राददात् ; यश्चेतनाचेतनेभ्यः सर्वेभ्योऽपि यद्यदपेक्षितं तत्तत् सर्वदा ददाति, स किं त्वामुपेक्षते । स एव तुभ्यमपि यद्यदिष्टं तत्तत्सर्वमपि देयं दास्यति । किं वृथा हाहाकारेण विलपनेन । शरीरचिन्तां परित्यज्य भगवच्चरणशरणो भव ।

"योगक्षेमं वहाम्यहम्"

"इति हि भगवदुक्तिः"

आकर्ण्यतां वत्स ! किञ्चिदन्यदपि । अहोरात्रगमनेनाऽऽयुः क्षीयते । कालगतेर्महतीं शीघ्रतां विचार्य त्वरस्व त्वम् । यदद्यकार्यं तदद्यैव कुरु । श्वः कर्तास्मीति मा वोचः । विषयतृष्णासमुन्मूलनार्थं परिकरबन्धं कुर्याः । विवेकेनेहलोकपरलोकतृष्णां छिन्धि । विवेकदार्ढ्येन वैराग्यं सम्पादय । विवेकदार्ढ्यं विना न कदापि वैराग्योत्पत्तिः । अनेकेषु दुर्घटविषमतीर्थेषु परिभ्रम्यताम् । तथा जटिलमुण्डित्वादिवेषाः क्रियन्ताम् । काषायवासश्च धार्यताम् । भिक्षान्नमपि भुज्यताम् । तथाऽपि सुदृढं विवेकमन्तरेण न विषयवैतृष्ण्यमुत्पत्तुमर्हति । तस्माद्विवेकपरो भव । त्वं त्वचिरेण जीर्णो भविष्यसि । किन्तु तृष्णा विवेकमन्तरेण न कदाऽपि जीर्णा स्यात् ।

ननु विवेकदार्ढ्यं कथं सिद्ध्यति ? विषयेषु रम्यत्वबुद्धिः सहजा बलवती च वर्तते; तस्या निवृत्तिः कथं स्यादिति चेच्छृणु । पौनःपुन्येन दोषदर्शनात्मकं विचारं कुरु । भूयो भूयो विचारेण तस्य दार्ढ्यमवश्यं स्यादेव । विषयेषु रम्यता भ्रान्तिश्च ततो विनङ्क्ष्यति । तदर्थं पौरुषं कुरु । पुरुषार्थेन हि सर्वाणि कार्याणि सिद्ध्यन्ति । सुप्तस्य कण्ठीरवस्य मुखे मृगा न प्रविशन्ति । पुरुषार्थ शून्या जना

हन्त! हन्त! वृक्षपाषाणसदृशाः कल्याणपथे चलितुं न कदाऽपि समर्था भवन्ति। तस्माद्व्यवसायी भव। शास्त्रानुमोदितं व्यवसायं कुरु सर्वदा।

तदुक्तम्:—

"सर्वमेवेह हि सदा संसारे रघुनन्दन।
सम्यक् प्रयुक्तात्सर्वेण पौरुषात्समवाप्यते॥
उच्छास्त्रं शास्त्रितं चेति द्विविधं पौरुषं स्मृतम्।
तत्रोच्छास्त्रमनर्थाय परमार्थाय शास्त्रितम्॥
संसारकुहरादस्मान्निर्गन्तव्यं स्वयं बलात्।
पौरुषं यत्नमाश्रित्य हरिणेवाऽरिपञ्जरात्॥
पौरुषेणान्नमाक्रम्य यथा दन्तेन चूर्ण्यते।
अन्यः पौरुषमाश्रित्य तथा शूरेण चूर्ण्यते॥" इति

"वासिष्ठम्"

अपि च विविक्तदेशसेवी भव। जनसंसदि अरतिं कुरु। विविक्तदेशेषु च गङ्गासलिलसमीरणपवित्रितं हिमगिरिशिखरमुत्तमतमं, विद्धि। विविक्तदेशसेवनं तु वैराग्यमतिमात्रं विवर्द्धयति। तस्मादुत्तराखण्डगिरिकन्दरनिवासरसिको भव। गङ्गायाः, पवित्रपाथस्तवमालिन्यमचिरादु-

न्मूलयिष्यति। विषयरागविमर्द्दनेन त्वां शीघ्रमेवेश्वरोन्मुखं करिष्यति। रागद्वेषाकुलस्यास्य जगतः, स्मृतिमुच्छेत्स्यति। जाह्नवीजलमेवसंसारतापतप्तानां संसारतापान्निवृत्तिमिच्छतामेकं शरणमस्मिन् कालेयकाल इति श्रद्धत्स्व। विष्णुपादोदकमिदं श्रद्धया भजस्व। गङ्गायाः सेवनमतिमात्रपुण्याधायीति गृहाण। साक्षात्परं ब्रह्मैव गङ्गेति निश्चित्य तामुपास्स्व।

तदुक्तम्:—

"गङ्गोपसेवनं नान्यद्भुक्तिमुक्तिप्रसिद्धये।
कालेयकाले तद्दोषदूषितालसचेतसाम्॥
गङ्गायादर्शनं पुण्यं गङ्गायामवगाहनम्।
गङ्गातीरनिवासश्च गङ्गानामजपार्चनम्॥
ब्रह्मैव परमं साक्षाद्द्रवरूपेण धावति।
पुमर्थकरणार्थं कौ गङ्गेति शुभसंज्ञया॥" इति

"श्री गङ्गोत्तरीक्षेत्रमाहात्म्यम्"

रे चित्त! दुर्दम! तादृशे विविक्ते देशे स्थित्वा वैराग्यमूर्त्तेर्नचिकेतस आख्यायिकामनुचिन्तय। नचिकेतः-

प्रभृतीनां वैराग्यनिधीनां चरितानुचिन्तनेन तव वैराग्याङ्कुरः शीघ्रमेववृद्धिमेष्यति ।

पञ्चवर्षो नचिकेतोनामा ऋषिपुत्रः पितृशापेन यमराजधानीं गतः । तत्र गत्वा यमेन नानाविधैः, शोभनैर्विषयैः, प्रलोभितोऽपि स तान् न परिजग्राह । स ऋषिबालो महाह्रदवद् न किञ्चिदपि विचचाल । विषयान् तृणवत् परितत्याज ।

"शतायुषः पुत्रपौत्रान्वृणीष्व
बहून्पशून्हस्तिहिरण्यमश्वान् ।
भूमेर्महदायतनं वृणीष्व
स्वयं च जीव शरदो यावदिच्छसि ॥"

"ये ये कामा दुर्लभा मर्त्यलोके
सर्वान्कामाँश्छन्दतः प्रार्थयस्व ।
इमा रामाः सरथाः सतूर्या
नहीदृशा लम्भनीया मनुष्यैः ॥

आभिर्मत्प्रत्ताभिः परिचारयस्व ।
नचिकेतो मरणं मानुप्राक्षीः ॥"

इति बहुभिः प्रलोभनैः प्रलोभितेनाऽपि नचिकेतसा धैर्येण विवेकेन चेत्थं प्रत्याख्यातम् ।

"श्वोभावा मर्त्यस्य यदन्तकैतत्
सर्वेन्द्रियाणां जरयन्ति तेजः ।
अपि सर्वं जीवितमल्पमेव
तवैव वाहास्तव नृत्यगीते ॥"

"नहि वित्तेन तर्पणीयो मनुष्यः ॥" इति

"कठ उ०"

एतादृशमहच्चरितानुचिन्तनेन सम्यग्विषयदोषानुदर्शनेन, चोच्छ्रितां सुदृढां वैराग्यभूमिमाधिरुह्य तत्र तेन तत्सहचरैः शमदमादिभिश्च नितरां मोदस्व । वैराग्यकञ्चुकेन विषयशराक्रमणादात्मानं रक्षय । वैराग्यशस्त्रेणेमं संसारवृक्षं छिन्धि । जन्मजरामरणशोकाद्यनेकानर्थात्मकः, कदलीस्तम्भवन्निःसारस्तृष्णाजलासेकोद्भूतदर्पो, बुद्धीन्द्रियविषयप्रवालाऽङ्कुरो, यज्ञदानतपआद्यनेकक्रियासु पुष्यः, सुखदुःखवेदनाऽनेकरसः, प्राण्युपजीव्यानन्तफलः, कष्टरुदितहाहामुञ्चमुञ्चेत्याद्यनेकशब्दकृततुमुलीभूतमहारव एष

संसारवृक्षो विवेकविज्ञानतीक्ष्णीकृतेन वैतृष्ण्यशस्त्रेण सत्वरमुच्छिद्यताम् । तत्र मा विलम्बं कुरु ।

रे चेतः ! सर्वश्रेयसां वैराग्यमेव मूलकारणमिति ज्ञात्वा वैराग्यमूलद्रविणं भव । ततश्च भगवत्पादपद्मपरिमार्गणतत्परं भव । भगवच्चरणाम्भोजभजनैकजीवनं भव ।

दुरीश्वरद्वारबहिर्वितर्दिका-
दुरासिकायै रचितोयमञ्जलिः ।
यदञ्जनाभं निरपायमास्तिनो
धनञ्जयस्यन्दनभूषणंधनम् ॥

"वैराग्यपञ्चकम्"

इति वैराग्यप्रकरणं समाप्तम् ।



श्रीनन्दनन्दन

THE GITA PRESS, GORAKHPUR. No. 1025.

श्रीगणेशाय नमः

श्रीगङ्गायै नमः

अथ भक्तिप्रकरणम्

"वंशीविभूषितकरान्नवनीरदाभात्
पीताम्बरादरुणबिम्बफलाधरोष्ठात् ।
पूर्णेन्दुसुन्दरमुखादरविन्दनेत्रात् ।
कृष्णात्परं किमपि तत्वमहं न जाने ॥"

रे चित्त ! त्वं विवेकवदसि । त्वं वैराग्यवदसि । हरिचरणौ नितरां स्मर । हरिचरणौ नितरां शरणीकुरु । मर्कटबन्धुतां हित्वा सुस्थिरं भव । हरिचरणभजनैकनिष्ठं भव । हरिभक्तिरेव परमपुरुषार्थैकसाधनमिति विद्धि । भक्तिः सर्वमङ्गलानां सर्वसिद्धीनां च परमं कारणमिति विद्धि ।

यथोक्तम् :—

"लाभस्तेषां जयस्तेषां कुतस्तेषाममङ्गलम् ।
येषां हृदिस्थो भगवान् मङ्गलायतनं हरिः ॥" इति

भक्तेन भक्त्याऽप्राप्यं नास्ति किञ्चिद्वस्तु लोके। भगवानपि भक्तस्य भक्तो भवति। भक्तपरवशः सन् भक्तकैङ्कर्ये नितरां बद्धपरिकरो वर्तते भगवान्। अर्जुनसारथ्यादिकं तु भगवतो भक्तपारवश्यद्योतकं प्रसिद्धतरमितिहासादिषु।

किञ्च भक्तिरनायासेनानुष्ठातु योग्या। तस्याः सरणिः सुगमतरा प्रशस्ततरा च। योगादिमार्गास्तु क्लिष्टतराः। तत्र चलितुं केचिच्छक्नुवन्ति विरलाः। न तथा भक्तिमार्गः। अतएव भक्तिरहस्यवेदिना सूत्रित श्रीनारदेन :—

"अन्यस्मात्सौलभ्यं भक्तौ" इति

कर्मध्यानज्ञानमार्गास्तु महद्भिरधिकारिभिरधिगन्तुमनुष्ठातुं च शक्या इति न, ते सर्वेषां सुलभतराः। भक्तिसाधनं तु साधारणैरपि सम्यगनुष्ठातुं शक्यत इति महनीयोऽयं पन्थाः। वर्णाश्रमवयोऽवस्थाव्यवस्थाभेदमन्तरेणैव सर्वैः सर्वदा कर्तुं योग्या भक्तिरिति महदिदं वैलक्षण्यं भक्तेः। न तत्र कर्कशो वर्णनियमः। नाश्रमनियमः। न वयो नियमः। नचावस्थानियमः। स्त्री, शूद्र, श्चाण्डालः,

पुल्कसो, म्लेच्छो, यवनो, हूणोऽन्यो वा यः कश्चित् बालो वा स्थविरो वा, यक्षो वा राक्षसो वा, सर्वेऽपि भगवद्भक्तावधिकारिण इति, भगवन्नामजपगुणश्रवणकीर्तनध्यानादीनां भजनकर्मणां न तान्प्रति प्रतिषेध इत्यहो भक्तेर्महत्सौलभ्यम् । न केवलं गुहशबरीप्रभृतयः पौराणिकाः, कबीरदासरैदासप्रभृतय आधुनिकाश्चाप्रशस्तयोनयो मनुष्याः, किन्तु जटायुगजेन्द्रप्रभृतयस्तिर्यग्जातयोऽपि भगवद्भक्तिपरा भगवन्तमीयुरिति सुविदितं पुराणेतिहासवेदिनाम् ।

तदुक्तम् :—

"दैतेया यक्षरक्षांसि स्त्रियः शूद्रा व्रजौकसः ।
खगा मृगाः पापजीवाः सन्ति ह्यच्युततां गताः॥"

इती "भागवतम्"

"स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्।"

इति श्रीभगवानपि योषापुरुषभेदमन्तरेण सर्वेषामपि यदि भक्ताश्चेत्परमां गतिमुपदिशति । किञ्च कर्मादिष्विव न तत्र देशकालादी नियमापेक्षा, न च बाह्यपदार्थापेक्षा, न च हिंसादिदोषा इति भक्तेरन्यतो महानुत्कर्षः ।

उक्तं हि भगवता भाष्यकारेण :—

"हिंसाद्रव्यान्तरपुरुषान्तरदेशकालादिनियमानपेक्षत्वमाधिक्ये कारणम्" इति

"विष्णुसहस्रनामभाष्यम्"

अथ भगवतो नामोच्चारणं, गुणमाहात्म्यश्रवणञ्च केन वा पुरुषेण न कर्तुं शक्यते ? यमनियमादिशमदमादिसाधनसम्पद्रहितः कनिष्ठतमोऽपि साधकः सर्वमेवतद्भजनादिकर्म कर्तुं प्रभवतीत्यहो ! भक्तिपथस्यान्यत्सौलभ्यम् । व्याधावस्थः श्रीवाल्मीकिमहर्षिर्मुनिजनद्रोही दुराचारमूर्तिरासीत् । रामनामोच्चारणं कर्तुमपि स समर्थो नासीत् । भगवन्नामोच्चारणासमर्थः सोऽपि न नैराश्यं गमितः । महान्तो मुनयोऽतिनीचाधिकारिण स्तस्यापि भगवद्भजनं सुलभमकार्षुः । "मरामरा" इत्येतन्नामजापेन स भगवन्तं भजितुमारेभे । दृश्यतां भक्तियोगस्य सौलभ्यम् । को वा न समर्थः स्याद्भक्तिमार्गगमने ?

अतो रे चेतस्त्वमपि सुलभं सुगममिमं भक्तिमार्गमवलम्ब्य भगवन्तं भज । भगवत्प्रेमरसास्वादनेन जीवितं चरितार्थीकुरु । भक्तिरेवमुक्तिसाधनमिति जानीहि ।

ऐकान्तिकभक्तेरुदय एव पुरुषार्थस्य परिसमाप्तिरिति विद्धि । भक्तिशिखरमधिरूढस्य भगवत्पदसमर्पितचित्तस्य न संसाराद्भयं, न यमाद्भयं, न यमकिङ्कराद्भयम् । निर्भयपदाधिरोहणी परमात्मभक्तिरिति नितरान्निश्चिनु ।

तदुक्तम् :—

"एतावानेवलोकेऽस्मिन्पुंसां निःश्रेयसोदयः ।
तीव्रेण भक्तियोगेन मनो मय्यर्पितं स्थिरम् ॥" इति

"सकृन्मनः कृष्णपदारविन्दयो,
निवेशितं तद्गुणरागि यैरिह ।
न ते यमं पाशभृतश्च तद्भटान्,
स्वप्नेऽपि पश्यन्ति हि चीर्णनिष्कृताः ॥" इति च

"श्रीमद्भागवतम्"

भक्त्या भगवान् सुष्ठु शीघ्रं प्रसीदति । भक्त्या भगवान् त्वरितमपुनर्भवं सायुज्यपदं प्रयच्छति । यथा भक्त्या भगवान् प्रसीदति, न तथा द्रव्यदानेन तपसा त्यागेन वा अन्येन केनचित् कर्मणा वा । जातिवयोविद्यादयोऽपि न खलु भगवतः प्रसादकारणम् । आचरणमपि

न परमात्मनोऽनुग्रहकारणम् । ऐकान्तिकी भक्तिरेव भगवतस्तोषकारणमिति व्यासादीनां प्रतिश्रववचनम् ।

उक्तं हि :—

"न दानं न तपो नेज्या न शौचं न व्रतानि च ।
प्रीयतेऽमलया भक्त्या हरिरन्यद्विडम्बनम् ॥" इति
"भागवतम्"

"व्याधस्याचरणं ध्रुवस्य च वयो विद्या गजेन्द्रस्य का
कुब्जायाः किमु नामरूपमधिकं किंतत्सुदाम्नो धनम् ।
वंशः को विदुरस्य यादवपतेरुग्रस्य किं पौरुषम्
भक्त्या तुष्यति केवलं नच गुणै र्भक्तिप्रियो माधवः ॥"
इति च

विशेषतोऽस्मिन् कराले कलिकाले तापत्रयतप्तानामनन्या गतिः परमात्मभक्तिरेव । वर्णाश्रममर्यादा वैधुर्यमुपगता । शरीरमनसोर्बलञ्च दुर्बलतां गतम् । यमनियमादयस्तु क्वापि दूरतः पलायिताः । वेदशास्त्रप्रामाण्यश्रद्धा च सुतरां प्रक्षीणतां गता । तथाविधे विषमिते दोषदूषिते काले हन्त ! हन्त ! वैदिकानामग्निहोत्रादिकर्मणां का नाम कथा ? प्राणायामप्रत्याहारादीनां का नाम

वार्ता ? अतः परमात्मसविधाधिगमने भगवद्भजनमेव मुख्योपाय इदानींतने काले। ततो रे चेतस्त्वमन्यत् सर्वमुज्झित्वा भगवन्नामोच्चारणकीर्तनस्मरणादिषु भजन-क्रियासु नितरां प्रवर्तस्व। कलिसर्पदर्पहरणे हरिभजन-महामन्त्र एव समर्थो नान्यत् किमपीति जानीहि ।

तदुक्तम् :—

"सत्यादित्रियुगे बोधो विरागो मुक्तिसाधकौ ।
कलौ तु केवला भक्तिर्ब्रह्मसायुज्यकारिणी ॥" इति

"पद्मपुराणम्"

"हरेर्नाम हरेर्नाम हरेर्नामैव केवलम् ।
कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥" इति च

"बृहन्नारदीयपुराणम्"

"ध्यानं तपः सत्ययुगे त्रेतायां यज्ञकर्म च ।
द्वापरे पूजनं दानं हरेर्नाम कलौ युगे ॥" इति च

अथ भक्तिः किं लक्षणेति चेच्छृणु। परमात्मनि परमप्रेमरूपा भक्तिः। "सा परानुरक्तिरीश्वरे" इति हि शाण्डिल्यसूत्रम्। परमात्मनि क्रियमाणो यो निरतिश-

योऽनुरागः सा भक्तिरिति सूत्रार्थः। यथा विषयिणां विषयेषु गाढगाढं निरन्तरञ्च प्रेम तथा आनन्दघने परमेश्वरेऽविनाशिनि यत्प्रेम सा भक्तिरिति निष्कृष्टोऽर्थः।

"द्रुतस्य भगवद्धर्माद्धारावाहिकतां गता।
सर्वेशे मनसो वृत्तिर्भक्तिरित्यभिधीयते॥" इति च
"**भक्तिरसायने**"

भगवद्गुणश्रवणेन द्रवावस्थां गतस्य चित्तस्य ईश्वरविषयिकाऽविच्छिन्ना वृत्तिर्भक्तिरित्युच्यते।

"मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ॥"
इति च "**श्रीमद्भागवते**"

कनिष्ठेषु योऽनुरागः सा दया, समानेषु योऽनुरागः स स्नेहः, श्रेष्ठेषु योऽनुरागः सा भक्तिरिति च प्रसिद्धतरं शास्त्रे लोके च। ईश्वरानुरागस्तु साधुसङ्गमेन तद्द्वारापापनाशनेन, विषयवैराग्येण, सङ्गत्यागेन, भगवद्गुणमाहात्म्यश्रवणेन च समुत्पद्यते। "तत्तु विषयत्यागात्सङ्गत्यागाच्च" इति च नारदीयं सूत्रम्। साधुसङ्गम एव

सर्वेषां श्रेयसां निदानम् । साधुसङ्गमेन पापः खलु निष्पापो भवति । अपवित्रः पवित्रो भवति । अविरक्तोऽपि विरक्तो भवति । ईश्वरविमुखश्चेश्वराभिमुखो भवति । साधुसङ्गतिः सद्य एव पापतापादिकं सर्वमपहरति । सज्जनसम्पर्कोऽतिमात्रनिकृष्टमप्युत्कृष्टयति । साधूनामनुग्रहादेव ईश्वरगुणश्रवणम् ईश्वरप्रेम च समुपजायते । तस्मात् श्रेयःप्रार्थिभिः साधवः सदा समुपगन्तव्याः ।

तथाचोक्तम् :—

"नाग्निर्न सूर्यो नच चन्द्रतारका,
न भूर्जलं खं श्वसनोऽथवाङ्मनः ।
उपासिताभेदकृतो हरन्त्यघं,
विपश्चितो घ्नन्ति मुहूर्तसेवया ॥

नह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ।
ते पुनन्त्युरुकालेन दर्शनादेव साधवः ॥

गङ्गा पापं शशी तापं दैन्यं कल्पतरुर्हरेत् ।
पापं तापं तथा दैन्यं सर्वं साधुसमागमः ॥" इति


"श्रीमद्भागवतम्"

"महानुभावसम्पर्कः कस्य नोन्नतिकारणम् ।
अशुच्यपि पयः प्राप्य गङ्गां याति पवित्रताम् ॥"

इति च "बृहदारण्यकवार्तिकम्"

सन्तो हि सन्त्यकारणकृपासिन्धवः । ते निसर्गत एव स्वाश्रितान् रक्षयन्ति विस्तृता विटपिन इव । यथा मत्स्यमहिला दर्शनेन, कूर्मसहधर्मिणी ध्यानेन, पक्षिपक्ष्मलाक्षी च संस्पर्शेनात्मीयं शिशुं पालयन्ति, तथा सज्जनोऽपि स्वसमाश्रितं पापतापाकुलं दीनजनं दर्शनस्पर्शनादिभिरुपदेशेन च रक्षयति स्नेहवात्सल्यचेतसा । तथाविधानां निसर्गदयानिधीनां सङ्गतिः परम्परया भक्तिकारणमिति विद्धि ।

साधुसमागमो महानुग्रहकारीति श्रीनारदस्य चरित्रमपि महदुदाहरणम् । नारदमुनिस्तु पुरातने जन्मनि कस्याश्चन दास्यास्तनूजः प्रावृट्काले चातुर्मास्यव्रतमनुतिष्ठतां महात्मनां शुश्रूषणे प्रवृत्त आसीत् । दान्ते शान्तेऽचपले बाले समदर्शिनां योगिनां तेषां कृपादृष्टिः सम्पतिता । तेषामेव शुश्रूषणेन सङ्गमेन च क्रमशस्तस्य चेतो विशुद्धिमगात् । भगवति धर्मे च रुचिः सञ्जाता । तैः



ग्रन्थकारः स्वामी आत्मानन्दः　　　　अस्मद् परम प्रिय मित्र पूज्य स्वामी गोपालदेवः

कीर्त्यमाना वासुदेवकथा स महत्या श्रद्धया शृण्वन्नासीत्। तथाच क्रमेण तस्य पुण्यश्लोके भगवति रतिश्चाभवत्। तथाचानन्तरे जन्मनि महामुनिजनपूज्यमत्युत्तमं भगवद्भक्तपदं प्राप्त् नारद इति पुराणवेदिनां नाविदितम्। अहो! साधुसङ्गममाहात्म्यम्। साधुसङ्गमः किं न कुरुते कल्याणम्।

तस्मान्महात्मनां सङ्गम एव न केवलं भक्तेरपि तु सर्वेषां श्रेयसां मूलकारणमिति निश्चितोऽर्थः।

"प्रथमं महतां सेवा तद्दयापात्रता ततः।
श्रद्धाऽथ तेषां धर्मेषु ततो हरिगुणश्रुतिः॥
ततो रत्यङ्कुरोत्पत्तिः"

इति च भक्त्युदये प्रथमकारणत्वेन महतां सेवैव निरूपिता श्रीमधुसूदनस्वामिभिः।

"महत्सेवां द्वारमाहुर्विमुक्ते-
स्तमोद्वारं योषितां सङ्गिसङ्गम्॥"

इति च महतां सेवा भक्तिहेतुत्वेन कीर्तिता श्रीमद्भागवते।

सत्सङ्गत्यादीनां बहुप्रकाराणां भक्तिसाधनानां परम्परयाऽनुष्ठानप्रकारोऽध्यात्मरामायणे च सम्यक् प्रदर्शितः।

"पुंस्त्वे स्त्रीत्वे विशेषो वा जातिनामाश्रमादयः।
न कारणं मद्भजने भक्तिरेव हि कारणम् ॥
यज्ञदानतपोभिर्वा वेदाध्ययनकर्मभिः।
नैव द्रष्टुमहं शक्यो मद्भक्तिविमुखैः सदा ॥
तस्माद्भामिनि सङ्क्षेपाद्वक्ष्येऽहं भक्तिसाधनम्।
सतां सङ्गतिरेवात्र साधनं प्रथमं स्मृतम् ॥
द्वितीयं मत्कथालाप, स्तृतीयं मद्गुणेरणम्।
व्याख्यातृत्वं मद्वचसां चतुर्थं साधनं भवेत् ॥
आचार्योपासनं भद्रे मद्बुद्ध्याऽमायया सदा।
पञ्चमं पुण्यशीलत्वं यमादि नियमादि च ॥
निष्ठा मत्पूजने नित्यं षष्ठं साधनमीरितम्।
मम मन्त्रोपासकत्वं साङ्गं सप्तममुच्यते ॥
मद्भक्तेष्वधिका पूजा सर्वभूतेषु मन्मतिः।
बाह्यार्थेषु विरागत्वं शमादिसहितं तथा ॥
अष्टमं नवमं तत्त्वविचारो मम भामिनि।
एवं नवविधा भक्तिः साधनं यस्य कस्य वा ॥

स्त्रियो वा पुरुषस्याऽपि तिर्यग्योनिगतस्य वा ।
भक्तिः सञ्जायते प्रेमलक्षणा शुभलक्षणे ॥
भक्तौ सञ्जातमात्रायां मत्तत्वानुभवस्तदा ।
ममानुभवसिद्धस्य मुक्तिस्तत्रैव जन्मनि ॥
स्यात्तस्मात्कारणं भक्तिर्मोक्षस्येति सुनिश्चितम् ।
प्रथमं साधनं यस्य भवेत्तस्य क्रमेण तु ॥
भवेत्सर्वं ततो भक्तिर्मुक्तिरेव सुनिश्चितम् ।
यस्मान्मद्भक्तियुक्ता त्वं ततोऽहं त्वामुपस्थितः ॥
इतो मद्दर्शनान्मुक्तिस्तव नास्त्यत्र संशयः ।" इति

नवविधा परमात्मनो भक्तिः प्रकारान्तरेण श्रीमद्भागवतेऽपि कर्तव्यत्वेनोपदिश्यते ।

"श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥" इति

तत्रैवान्यत्राऽपि भक्तेः कारणानीत्थं परम्परया निरूपितानि ।

"भक्तियोगः पुरैवोक्तः प्रीयमाणाय तेऽनघ ।
पुनश्च कथयिष्यामि मद्भक्तेः कारणं परम् ॥

श्रद्धाऽमृतकथायां मे शश्वन्मदनुकीर्तनम् ।
परिनिष्ठायान्तु पूजायां स्तुतिभिः स्तवनं मम ।
आदरः परिचर्यायां सर्वाङ्गैरभिवन्दनम् ।
मद्भक्तपूजाभ्यधिका सर्वभूतेषु मन्मतिः ॥
मदर्थे त्व(ष्व)ङ्गचेष्टा च वचसा मद्गुणेरणम् ।
मय्यर्पणञ्च मनसः सर्वकामविवर्जनम् ॥
मदर्थेऽर्थपरित्यागो भोगस्य च सुखस्य च ।
इष्टं दत्तं हुतं जप्तं मदर्थं यद्व्रतं तपः ॥
एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनाम् ।
मयि सञ्जायते भक्तिः कोऽन्योऽर्थोऽस्यावशिष्यते॥"

इति ।

अतो रे मनः! प्रथमतः सत्सङ्गं कुरु। दुःसङ्गञ्च दूरतः परित्यज । यथा सत्सङ्ग उन्नतिकारणं तथा दुःसङ्गोऽवनतिकारणमिति जानीहि। दुर्जनानां भगवद्विमुखानां सङ्गेन भगवद्वैमुख्यं, तेषां सङ्गत्यागेन सतां सङ्गेन च भगवदाभिमुख्यं च भवति। कुसङ्गो न केवलं भगवद्भक्तेः किन्तु लौकिकानां सर्वेषामपि श्रेयसां प्रतिबन्धक इति विद्धि ।

उक्तं हि :—

"अतः सङ्गः परित्याज्यो, दुष्टानां सर्वदैव हि ।
दुःसङ्गी च्यवते स्वार्थाद्यथेयं राजकन्यका ॥" इति

अ० रा०

"वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह ।
न मूर्खजनसम्पर्कः सुरेन्द्रभवनेष्वपि ॥" इति च

वैराग्यशतकम्

तस्मात्कुसङ्गं दूरतस्त्यक्त्वा सर्वदा सत्सङ्गनिरतो भव । ततश्च भगवद्गुणमाहात्म्यं शृणु, तत्र श्रद्धां विधेहि । भगवद्गुणान् सततं कीर्तय । भगवतः पवित्रनामान्यविरतं जप । भगवत्तत्त्वं स्मर । तच्चरणपङ्कजे प्रचुरप्रमोदेन परिचर । तस्य पूजनवन्दनादिके निरतो भव सर्वदा । एवं भगवतो निरतिशयां निष्कलङ्कां भक्तिं सम्पादय । सेवकभावेन भगवन्तमित्थं जानीहि । अहं संसारी, सुखी दुःखी, अल्पज्ञः, परतन्त्रः, कर्त्ता, भोक्ताऽस्मि । त्वन्तु सर्वज्ञः स्वतन्त्रोऽकर्त्ताऽभोक्ताऽसंसारी सच्चिदानन्दघनः सर्वनियामकः करुणानिधिरसि । अतो दास्यभावेन तं सर्वेश्वरं

स्वामिनमनवरतमित्थं प्रार्थय। दीनस्वरेण दीननाथं दयानिधिमिदं याचस्व।

हे परमात्मन्! हे भक्तप्रिय! करुणाकर! देवाधिदेव! सर्वाभीष्टप्रद! पापहारिन्! हे विश्वम्भर! इयन्तमेवार्थं त्वामहं याचे यद्भवच्चरणसरोजे मम जन्मनि जन्मनि भवत्प्रसादाद्भक्तिरस्तु। कान्ताकनकाद्यासक्तानां यथा तेष्वभङ्गुरा प्रीतिस्तथा तव मञ्जुलचरणयोर्मेऽस्तु सदा।

उक्तं हि:—

"या प्रीतिरविवेकानां विषयेष्वनपायिनी।
त्वामनुस्मरतः सा मे हृदयान्माऽपसर्पतु॥" इति

विष्णुपुराणम्

हे हृदयगुहावासिन्। त्वच्चरणाम्भोजभक्तिरसायनं ये पिबन्ति, ते संसारे न मुह्यन्ति। हे प्रभो! मम यज्ञदानादिकरणेनामुष्मिकवित्तसम्पादनेऽथवैहिकवित्तसम्पादने कामोपभोगे यशसि वा प्रवृत्तिर्मास्तु। यद्यद्भव्यं पूर्वकर्मानुरूपं तत्तद्भवतु नाम। तत्र किमर्थो व्यवसायः?

व्यवसायस्तु ममास्तु नितरां तव चरणस्मरणकर्माणि । मम निवासः स्वर्गे वा नरके वा भुवि वा पाताले वा भवतु । देवत्वं नरत्वं कीटत्वं पशुत्वं वा मम भवतु । तत्तल्लोकेषु तत्तच्छरीरेषु सर्वेष्वपि यदि त्वच्चरणाम्भोजभक्तिर्निश्चला मम हृदि स्यात्, तर्हि लोकभेदेन शरीरभेदेन वा किं भवेत् ।

तथा चोक्तं भगवत्पादैः—

"नरत्वं देवत्वं नगवनमृगत्वं मशकता,
पशुत्वं कीटत्वं भवतु विहगत्वादिजननम् ।
सदा त्वत्पादाब्जस्मरणपरमानन्दलहरी-
विहारासक्तं चेद्धृदयमिह किन्तेन वपुषा ॥" इति

"शिवानन्दलहरी"

तिरस्कृत्य सर्वचिन्तनं, त्वच्चरणौ मरणेऽपि जन्मजन्मान्तरेष्वप्यहं चिन्तयेयमितितदर्थमनुग्रहं कुरु । सामर्थ्यं देहि । मम वृत्तिः परमात्मन्यपारकरुणासिन्धौ त्वय्येव रमताम् । भगवच्चरणस्मरणाऽमृतेन तुल्यमपरं सुखतरमहं किञ्चिदपि न जाने । ततो विषयध्यानतो मां निवर्तय ।

यत उक्तम् :—

"विषयान्ध्यायतश्चित्तं विषयेषु विषज्जते ।
मामनुस्मरतश्चित्तं मय्येव प्रविलीयते" ॥ इति

"श्रीमद्भागवतम्"

अहो ! विषयध्यानं तद्भोगश्चातिमात्रदुःखहेतुरिति जानन्नपि ततो निवर्तितुमहं न प्रभवामि । पापप्रेरणया तत्र पुनः पुनः प्रवृत्तिर्मम जायते । हन्त ! हन्तैवमघनिधेर्मोघयत्नस्य मोघाऽशस्य मोघज्ञानस्य मम हे पापहारिन् ! त्वत्कृपैव शरणं, नान्यागतिः । अतो हे गोविन्द ! हे प्रभो ! विषयवासनाकालुष्यान्मां सर्वतः सर्वदा पाहि ।

हे कामद ! करुणानिधे ! भवद्दासोपरि करुणादृष्टिः सर्वदा भवतु । द्वन्द्वसमीराहतानां पुत्रकलत्राऽऽभारकर्शितानां भवसागरगतानां नराणां शरणं त्वमेव पोतरूपेण भवसि भवेऽस्मिन् । अपराधशतसंव्याप्तं भीमभवार्णवे पतितमगतिं शरणागतं संसारदावानलतापतप्तं मां प्रभो ! अव । संसारदुःखक्षतिमातनुष्व । एतं भवसिन्धुं कथं तरेयम् ? का वा मे गतिः ? कतमो मेऽस्त्यु-

पायः ? हे हरे ! अहं न जाने किञ्चित् । त्वमेव मां रक्ष ; त्वमेव मे शरणं ; त्वामेवाहमाश्रयामि । अव माम् । अव माम् ।

"इतः परन्त्वच्चरणारविन्दयोः,
स्मृतिः सदा मेऽस्तु भवोपशान्तये ।
त्वन्नामसङ्कीर्तनमेव वाणी
करोतु मे कर्णपुटं त्वदीयम् ॥
कथामृतं पातु करद्वयं ते
पादारविन्दार्चनमेव कुर्यात् ।
शिरश्च ते पादयुगप्रणामं
करोतु नित्यं भवदीयमेवम् ॥"

इति "अ० रा०"

यद्विराधेन सर्वदा सर्वेन्द्रियैस्तव सेवनं सम्प्रार्थितं तन्मह्यमपि दयया देहि । हे करुणासिन्धो ! कारुण्य-पूर्णदृष्ट्या निरीक्ष्य अभीतिं देहि । हे प्रभो ! सन्तप्तं भवतापदावदहनज्वालाभिर्मां रक्षय । हे सर्वस्वामिन् ! नमस्ते ! हे नतलोकबन्धो ! कारुण्यसिन्धो ! भवाब्धौ

पतितमात्मीयकटाक्षपातेन मां भीतं प्रपन्नं मृत्योः परिपाहि। शरण्यमन्यद्यदहं न जाने।

मनसा यन्मया चिन्तितं वचसा यदुक्तं करचरणादिभिर्यद्विचेष्टितम्, निशासु दिवसेषु च यत्कृतं, तत्सर्वं तवार्चनमेव भूयात्। सम्पुटीकृतेनाञ्जलिना, नतेन शिरसा, रोमोद्गमैर्गात्रैः, स्वरगद्गदेन कण्ठेन, बाष्पाम्बुपूर्णेन नयनेन, त्वच्चरणयुगलध्यानसुधाऽस्वादमत्तया वृत्त्या चास्माकं जीवितं सततं सम्पद्यताम्।

हे भगवन्! लोकाः सुधां परित्यज्य विषं पिबन्ति। भागवतानि पवित्रनामानि त्यक्त्वा मूर्खा अनुपकारकान् ग्रन्थान् पठन्ति। धिक् तान्। हे वेदवेदान्तवेद्य! मम प्रयाणसमयेऽयाच्यमक्रय्यमक्षय्यं पापहरं मोक्षदं तव नामामृतं मम वृत्तिर्वाक् च पिबतु।

हे जगदन्तरात्मन्! तुभ्यमनन्तनमस्कारवचनमस्तु। मनसा वाचा कर्मणा च त्वां भक्त्या प्रणमामि। हे परात्मन्! त्वं ब्रह्मणोऽप्यादिकर्ताऽसि। हे अनन्तदेवेश! जगन्निवास! त्वमक्षरोऽसि, वेदान्तेषु श्रूयते यत्तत् त्वं सतोऽसतश्च परोऽसि। त्वमादिदेवोऽसि। जगतः स्रष्टासि।

सर्वासु पूर्षु शयनात् त्वमेव पुरुषोऽसि । चिरन्तनस्त्वमेवाऽसि । अस्य विश्वस्य प्रकृष्टं निधानमपि त्वमसि । त्वं सर्वस्यैव वेद्यजातस्य वेदिताऽसि । यच्च वेदनार्हमस्ति तदपि त्वमसि । हे देवेश ! त्वयेदं समस्तं व्याप्तम् । हे अनन्तरूपात्मन् ! तव रूपाणामन्तो नास्ति । त्वं वायुरसि । त्वं यमोऽसि । त्वमपां पतिर्वरुणोऽसि । त्वं चन्द्रमा असि । त्वं कश्यपादिः प्रजापतिरसि । अनेकसहस्रं भूयोऽभूयोऽपि नमोनमस्ते । त्वदन्या मम गतिर्नास्ति । श्रद्धाभक्त्यतिशयेनाऽपरितोषेण च भूयो भूयस्त्वां नमस्करोमि । पूर्वस्यां दिशि तुभ्यं नमः, पृष्ठतोऽपि तुभ्यं नमः, सर्वासु दिक्षु तुभ्यं नमः । मलीमसमनस्तया पुत्रकलत्रादिषु धनमानादिषु चासक्त्या त्वच्चरणाम्बुजस्मृतिमन्तरेण यत् किञ्चिदागः कृतवान् तत् सर्वं हे अच्युत ! क्षमस्व । नीचैः शरीरं कृत्वा त्वामीशितारमीड्यं प्रणमामि । पुत्रस्यापराधं पिता यथा क्षमते, यथा प्रियाया अपराधं प्रियः क्षमते, तथैव मेऽपराधं त्वं क्षन्तुमर्हसि ।

त्वं शरणागतवत्सलोऽसि ; त्वं निजभक्तदुःखहरोऽसि । त्वं कामारिरसि ; त्वं शत्रुनाशकोऽसि ; त्वंबला-

नामपि बलोऽसि ; इति श्रुत्वा मत्वा त्वामेव नितरां शरणं प्राप्तुमिच्छामि । मां रक्ष रक्ष । कामक्रोधलोभमात्सर्यादिशत्रुभ्यो मां नितान्तं रक्षय । तव स्मरणकीर्तनादिभिर्ममायुर्व्यतिगच्छतु । हे हरे ! मामचिरेणात्मसात्कुरु ।

एवं द्रुतभावेन निरन्तरं प्रार्थयत् भो चेतस्त्वम्भगवदेकपरं भव । भगवदेकपरायणं भव । भगवन्मञ्जुलस्वरूपैकस्मृति भगवदेकजीवनं भगवदेकप्रमोदश्च भव । अपि च भगवदेकरति भगवदेकक्रीडं भगवदेकसन्तोषश्च भव । एवं भगवद्भक्तिरसास्वादरसिकं भव । भक्तिसाम्राज्यसम्राड् भव । भगवत्स्मृतिसन्तानसंमोदसुधां नितरां पिब । यदि च भावबलेन भगवतो नितान्तचिन्तने त्वमसमर्थस्तर्हि पतञ्जलिप्रोक्ताष्टाङ्गयोगसाधनेनाऽपि क्रमश आत्मानं स्वाधीनीकृत्य तस्मिन्निरोद्धुं नितरां प्रयतस्व ।

भगवन्नामसुधाश्च सुतरामितरानपेक्षमास्वादय । नामजपयज्ञस्तु सुकरो महत्तरश्चेति विद्धि । द्रव्यादियज्ञेभ्यः श्रेष्ठतरः फलवत्तरश्च जपयज्ञः ।

उक्तं हि भगवता :—

"यज्ञानां जपयज्ञोऽस्मि" इति ।

"तज्जपस्तदर्थभावनम्"

इति सूत्रितश्च महर्षिणा श्रीपतञ्जलिना भगवन्नामजपमाहात्म्यम् । तस्मात् परमेश्वरनामजपकर्मणि विशेषतः प्रवर्तस्व । जपयज्ञानुष्ठाननिष्ठया श्रेष्ठतमं परमेष्ठिवन्द्यं परमात्मानं प्राप्तुं नियतं प्रयतस्व ।

"ॐनमो भगवते वासुदेवाय"

"हरे राम हरे राम राम राम हरे हरे ।
हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ॥"

"श्रीकृष्ण गोविन्द हरे मुरारे
हे नाथ नारायण वासुदेव ।"

"गोविन्द गोविन्द हरे मुरारे
गोविन्द गोविन्द मुकुन्द कृष्ण ।
गोविन्द गोविन्द रथाङ्गपाणे
गोविन्द गोविन्द नमामि नित्यम् ॥"

इत्यादीनां भगवन्नाम्नां प्रेमाऽवेशेन निरन्तरं जपं कुरु ।

"रामनामजपतां कुतो भयं
सर्वतापशमनैकभेषजम् ।

पश्य तात मम गात्रसन्निधौ
पावकोऽपि सलिलायतेऽधुना ॥"

इति प्रह्लादवचनमनुस्मृत्य भगवन्नामजपे श्रद्धामव्यभिचारिणीं निष्ठाञ्चानुतिष्ठ । अथ च

"अविनयमपनय विष्णो दमय
मनः शमय विषयमृगतृष्णाम् ।
भूतदयां विस्तारय तारय
संसारसागरतः ॥ १ ॥

दिव्यधुनीमकरन्दे परिमल-
परिभोगसच्चिदानन्दे ।
श्रीपतिपदारविन्दे भवभय-
खेदच्छिदे वन्दे ॥ २ ॥

सत्यपि भेदापगमे नाथ
तवाहं न मामकीनस्त्वम् ।
सामुद्रो हि तरङ्गः क्वचन
समुद्रो न तारङ्गः ॥ ३ ॥

उद्धृतनगनगभिदनुजदनुज-
कुलामित्रमित्रशशिदृष्टे ।

दृष्टे भवति प्रभवति न भवति
किं भवतिरस्कारः ॥ ४ ॥

मत्स्यादिभिरवतारैरवतार-
वताऽवता सदा वसुधाम् ।
परमेश्वर परिपाल्यो भवता
भवतापभीतोऽहम् ॥ ५ ॥

दामोदर गुणमन्दिर सुन्दर-
वदनारविन्द गोविन्द ।
भवजलधिमथनमन्दर
परमं दरमपनय त्वं मे ॥ ६ ॥

नारायण करुणामय शरणं
करवाणि तावकौ चरणौ ।
इति षट्पदी मदीये
वदनसरोजे सदा वसतु" ॥ ७ ॥

"षट्पदी"

"गङ्गातरङ्गरमणीयजटाकलापं
गौरीनिरन्तरविभूषितवामभागम् ।

नारायणप्रियमनङ्गमदापहारं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ १ ॥

वाचामगोचरमनेकगुणस्वरूपं
वागीशविष्णुसुरसेवितपादपीठम् ।
वामेन विग्रहवरेण कलत्रवन्तं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ २ ॥

भूताधिपं भुजगभूषणभूषिताङ्गं
व्याघ्राजिनाम्बरधरं जटिलं त्रिनेत्रम् ।
पाशाङ्कुशाभयवरप्रदशूलपाणिं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ३ ॥

शीतांशुशोभितकिरीटविराजमानं
भालेक्षणानलविशोषितपञ्चबाणम् ।
नागाधिपारचितभासुरकर्णपूरं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ४ ॥

पञ्चाननं दुरितमत्तमतङ्गजानां
नागान्तकं दनुजपुङ्गवपन्नगानाम् ।
दावानलं मरणशोकजराटवीनां
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ५ ॥

तेजोमयं सगुणनिर्गुणमद्वितीय-
मानन्दकन्दमपराजितमप्रमेयम् ।
नागात्मकं सकलनिष्कलमात्मरूपं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ६ ॥
आशां विहाय परिहृत्य परस्य निन्दां
पापे रतिञ्च सुनिवार्य मनः समाधौ ।
आदाय हृत्कमलमध्यगतं परेशं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ७ ॥
रोगादिदोषरहितं स्वजनानुराग
वैराग्यशान्तिनिलयं गिरिजासहायम् ।
माधुर्यधैर्यसुभगं गरलाभिरामं
वाराणसीपुरपतिं भज विश्वनाथम् ॥ ८ ॥
वाराणसीपुरपतेः स्तवनं शिवस्य
व्याख्यातमष्टकमिदं पठते मनुष्यः ।
विद्यां श्रियं विपुलसौख्यमनन्तकीर्तिं
सम्प्राप्य देहविलये लभते च मोक्षम् ॥९॥
व्यासाष्टकमिदं पुण्यं यः पठेच्छिवसन्निधौ ।
शिवलोकमवाप्नोति शिवेन सह मोदते"।१०॥
इति "विश्वनाथाष्टकम्"

"शिवा शान्ता शीता हरिपदयशोभूतिरतुला
स्वयंज्योतिर्लक्ष्मीर्निरवधिसुखस्वादुमधुरा ।
सुधाधारासारा त्रिगुणपरिवारातिविमला
चिदानन्दाकारा मम वसतु चित्ते त्रिपथगा ॥१॥

निराकारा सृष्टेरभवदियमीशात्मनि पुरा
जगद् दृष्ट्वा देवा सुरनरमुखभ्रान्तिनिबिडम् ।
निमग्नं दुःखाब्धौ दुरितरचिते वीक्ष्य कृपया
समुद्धर्तुं नीराकृतिमिह विधायाविरभवत् ॥ २ ॥

स्वयंसिद्धा संवित्प्रकृतिपुरुषेशाकृतिरजे
त्वमात्मा भूतानां परिमिततनूनां जनिभृताम् ।
निजां शक्तिं चित्रां स्थिरचरजगद्धेतुमुचिताम्
प्रविश्येदं सर्वं नियमयसि भागीरथि साति ॥३॥

विधिर्विष्णुः शम्भुस्त्वमसि पुरुषत्वेन सकला
रमोमागीर्मुख्या त्वमसि ललना जह्नुतये ।
निराकारागाधा भगवति सदा त्वं विहरसि
क्षितौ नीराकारा हरसि जनतापान् स्वकृपया॥४॥

त्रिधा भूत्वा गङ्गे दिवि भुवि च पातालभुवने
सुरान्नृन्नागादीन्निजजलगतान् पावयसि यान् ।

विशुद्धास्ते भूत्वा सुरनरभुजङ्गप्रभृतयः ।
सुखं ब्रह्माखण्डं निरवधिपदं यान्ति सुभगाः ॥५॥

आदावादिपितामहस्य नियम
व्यापारपात्रे जलं
पश्चात्पन्नगशायिनो भगवतः
पादोदकं पावनम् ।
भूयः शम्भुजटाविभूषणमणि—
र्जन्होर्महर्षेरियं
कन्या कल्मषनाशिनी भगवती
भागीरथी भूतले ॥ ६ ॥

गाङ्गं वारि मनोहारि मुरारिचरणच्युतम् ।
त्रिपुरारिशिरश्चारि पापहारि पुनातु माम्॥७॥

पापापहारि दुरितारि तरङ्गधारि ।
शैलप्रचारि गिरिराजगुहाविदारि ।
झङ्कारकारि हरिपादरजोपहारि
गाङ्गं पुनातु सततं शुभकारि वारि ॥ ८ ॥

गङ्गे मातर्नमस्तुभ्यं गङ्गे मातर्नमोनमः ।
पावनी पतितानां त्वं पावनानां च पावनी ॥९॥

नमस्तुभ्यं महाभागे भागीरथरथानुगे ।
नमस्तुभ्यं जगन्नाथे गङ्गे त्रिपथगामिनी" ॥ १० ॥

"गङ्गास्तोत्रम्"

एवमाद्यगणितगुणमाहात्म्यस्य भगवतः स्तोत्रमपि यथारुचि नितरां पठ प्रेमगद्गदेन कण्ठेन ।

एवं विधाभिर्भगवद्भजनक्रियाभिः स्वनुष्ठिताभिः संसारपारं गन्तुमिच्छ । संसारक्लेशान् संसारव्यापारांश्चातितरामतिगच्छ । स्वाधिकारानुरूपगुरूपदिष्टभगवत्स्वरूपचिन्तनेन संसारचिन्तनबाधनं कुरु । भगवद्गुणानुकीर्तनतः संसारगुणानुकीर्तनरोधनं कुरु । भगवत्कर्मसम्पादनेनेतरकर्मविसर्जनं कुरु । भगवदस्तित्वविचारपाटवाज्जागतिकाऽस्तित्वबुद्धेरवसादनं कुरु । भगवदनुस्मरणनैपुण्येनेतरविस्मरणं कुरु । भगवन्नामोच्चारणेनापरनामतिरस्करणं कुरु । परमप्रेमास्पदस्य श्रीभगवतः पवित्रप्रेममुग्धतया कलुषमयपरिच्छिन्नपरिणामिदुःखहेतुव्यक्तिगतप्रेम्णो बाधनं कुरु । भगवद्रूपभावनेन जाग्रज्जागतरूपापाकरणं कुरु । एवञ्च भगवद्भक्तिसाधनेन निरन्तरमनुष्ठीय-

मानेन—

"अजातपक्षा इव मातरं खगाः
स्तन्यं यथा वत्सतराः क्षुधार्ताः ।
प्रियं प्रियेवव्युषितं विषण्णा
मनोऽरविन्दाक्ष दिदृक्षते त्वाम् ॥"

"भागवतम्"

इत्युक्तरीत्या प्रेमावेशजनितयाऽतिमात्रव्याकुलताजनिकया दृढदर्शनोत्कण्ठया च भगवतः स्वरूपं त्वमचिरेण साक्षात्करिष्यसि । भगवान् स्वयमेव स्वकीयेन मञ्जुलरूपेण तवाक्षिपथमवतरिष्यति । तथा च तव भक्तिः सुतरां सफली भविष्यति ।

"न पारमेष्ठ्यं न महेन्द्रधिष्ण्यं
न सार्वभौमं न रसाधिपत्यम् ।
न योगसिद्धीरपुनर्भवं वा
वाञ्छन्ति यत्पादरजःप्रपन्नाः" ॥

"भागवतम्"

इत्युक्तां प्रेमानन्दानुभवस्य परां काष्ठाञ्चाधिगमिष्यसि ।

"क्वचिद्रुदन्त्यच्युतचिन्तया क्वचि—

द्धसन्ति नन्दन्ति वदन्त्यलौकिकाः।

नृत्यन्ति गायन्त्यनुशीलयन्त्यजं

भवन्ति तूष्णीं परमेत्य निर्वृताः॥"

"भागवतम्"

इत्येवं भगवत्प्रेमोन्मत्तदशाश्च त्वमाशु सम्प्राप्स्यसि। तथा च परमात्मगतिश्च त्वं गमिष्यसि। कामेन द्वेषेण च बहवः परमात्मपदं गताः। तर्हि भक्त्या त्वं परमपदमवश्यं व्रजिष्यसीति किमु वक्तव्यम्।

तथाचोक्तम्ः—

"कामाद्द्वेषाद्भयात्स्नेहाद्यथा भक्त्येश्वरे मनः।

आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः॥

गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः।

सम्बन्धाद् वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो॥"

इति "भागवतम्"

एतादृशं भक्तिभावस्य परमोत्कर्षमुपगतो मर्त्यो धन्यो मान्यः पूज्यश्च मर्त्यामर्त्यैरिति विद्धि। यः कोऽपि

वा हरिभक्तो हरिवत् सुष्ठु पूजनीयो भवति । वयोवर्णाश्रमादयस्तु तादृशस्य पूजनं प्रतिबद्धुं न पर्याप्ता भवन्ति । अहो ! भक्तिमाहात्म्यम् ! हरिभक्तिस्त्वधममुत्तमयति । चाण्डालञ्च ब्राह्मणयति ।

तदुक्तम् :—

"अन्त्यजो वाधमो वाऽपि मूर्खो वा पतितोऽपि वा ।
शिवं प्रपन्नश्चेत् कृष्ण पूज्यस्सर्वसुरासुरैः ॥" इति

"शिवपुराणम्"

"चाण्डालोऽपिमुनिश्रेष्ठ विष्णुभक्तो द्विजाधिकः ।
विष्णुभक्तिविहीनश्च द्विजोऽपि श्वपचाधमः ॥" इति

च "नारदपुराणम्"

एवं भक्तिप्रकर्षेण परमात्मानं परमात्मत्वेनोपास्य, अथ च स्वात्मत्वेनापरोक्षीकृत्य कृतकृत्यो भवति पुरुषः ।

तथा भक्तिप्राचुर्यान्निरस्तसमस्तमलं निर्विक्षेपं नितरामतिमात्रवैराग्यपूर्णं सुरसरिदुदकवदत्यन्तविशुद्धं परमात्मतत्त्वज्ञाननिष्ठायोग्यं ततश्च तन्निष्ठाद्वारा परमपुमर्थप्रापकञ्च सम्पद्यते तवाऽपि तत्त्वम् ।

उक्तं हि :—

"वासुदेवे भगवति भक्तियोगः प्रयोजितः ।
जनयत्याशु वैराग्यं ज्ञानं यत्तदहैतुकम् ॥" इति

"भागवतम्"

"अतो मद्भक्तियुक्तस्य ज्ञानं विज्ञानमेव च ।
वैराग्यञ्च भवेच्छीघ्रं ततो मुक्तिमवाप्नुयात्" ॥ इति

"अ० रा०"

अतो यदि श्रेयोऽर्थी चेत्, तर्हि त्वं भगवति भक्तवत्सले निरतिशयां भक्तिं कुरु ।

"रक्षोमण्डलखण्डपण्डितमहावेतण्डशुण्डालस-
द्दोर्दण्डं निखिलाण्डपिण्डनकृतौ शौण्डं तथा मुण्डिभिः
ध्येयं दण्डकमण्डलूपकरणैश्चण्डांशुवंशोद्भवं
गण्डे कुण्डलमण्डितं रघुपतिं कोदण्डपाणिं भजे ॥"

इति भक्तिप्रकरणं समाप्तम् ।



भगवान् श्रीशङ्कराचार्य

GITA PRESS,GORAKHPUR. No. 1046.

श्रीगणेशाय नमः

ॐ श्रीगङ्गायै नमः

ज्ञानप्रकरणम्

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥
"तमेव विदित्वाऽति मृत्युमेति,
नान्यः पन्था विद्यतेऽयनाय।"
"तरति शोकमात्मवित्"
"ऋते ज्ञानान्न मुक्तिः"
"ज्ञानवान्मां प्रपद्यते"
"ज्ञानी त्वात्मैव मे मतम्"

इत्यादिश्रुतिस्मृतिवचनेभ्यो ब्रह्मात्मैक्यविषयकं ज्ञानमेव चतुर्थपुरुषार्थस्य मोक्षस्य साक्षात्साधनमिति निश्चितोऽर्थः। तच्च ज्ञानं चित्तस्य परमां विशुद्धिमेकाग्रताञ्च विना न समुत्पद्यत इति कर्मणोपासनया च ते सम्पाद-

नीये। निष्कामकर्मभिर्दानव्रततपोयज्ञादिभिर्वैराग्यसहिता विशुद्धिर्भवति। उपासनरूपया भक्त्या चैकाग्र्यं सम्भवति। विरागभावश्च पूर्वाधिकमत्यन्तं वर्द्धते। ततश्च ज्ञानाभ्यासाधिकारः प्रवर्तते। ज्ञानाभ्यासेन च ज्ञानमुत्पद्यते ज्ञानेन च मोक्ष इत्यौपनिषदी रीतिः। तथा च रे चित्त! ज्ञानविचारे प्रवर्तस्व। ज्ञानविचारेण ज्ञानि भव। ज्ञानसम्पादनेन स्वजन्म सफलीकुरु। त्वं विवेकवदसि, त्वं वैराग्यवदसि, त्वं शमादिगुणवदसि, त्वं मुमुक्षु असि, एवं त्वं सम्यगनुष्ठितकर्मोपसानाभिः साधनचतुष्टयसम्पन्नमसि।

"ब्रह्म सत्यं जगन्मिथ्येत्येवं रूपो विनिश्चयः।
सोऽयं नित्यानित्यवस्तुविवेकः समुदाहृतः॥ १॥
तद्वैराग्यं जिहासा या दर्शनश्रवणादिभिः।
देहादिब्रह्मपर्यन्ते ह्यनित्ये भोगवस्तुनि॥ २॥
विरज्य विषयव्राताद्दोषदृष्ट्या मुहुर्मुहुः।
स्वलक्ष्ये नियतावस्था मनसः शम उच्यते॥ ३॥
विषयेभ्यः परावर्त्य स्थापनं स्वस्वगोलके।
उभयेषामिन्द्रियाणां स दमः परिकीर्तितः॥ ४॥
बाह्यानालम्बनं वृत्तेरेवोपरतिरुत्तमा।

सहनं सर्वदुःखानामप्रतीकारपूर्वकम् ॥ ५ ॥
चिन्ताविलापरहितं सा तितिक्षा निगद्यते ।
शास्त्रस्य गुरुवाक्यस्य सत्यबुद्ध्यवधारणम् ॥ ६ ॥
सा श्रद्धा कथिता सद्भिर्यया वस्तूपलभ्यते ।
सर्वदा स्थापनं बुद्धेः शुद्धे ब्रह्मणि सर्वदा ॥ ७ ॥
तत्समाधानमित्युक्तं नतु चित्तस्य लालनम् ।
अहङ्कारादिदेहान्तान् बन्धानज्ञानकल्पितान् ॥८॥
स्वस्वरूपावबोधेन मोक्तुमिच्छा मुमुक्षुता ।"

"विवेकचूडामणिः"

इत्येवं भगवत्पादैर्व्याख्यातेन साधनचतुष्टयेनालङ्कृतमसि । नालङ्कृतश्चेद्ब्रह्मविचारे त्वं नाधिकारवदसि ।

"अथातो ब्रह्मजिज्ञासा"

इति च व्याससूत्रं साधनचतुष्टयसम्पत्तेरनन्तरमेव ब्रह्मविचारयोग्यतामादिशति । त्वं तु कृतकर्मोपास्ति भक्तियुक्तं साधनसम्पूर्णमसि । अतस्त्वं ब्रह्मविचारसमर्थमसि ।

रे चेतः ! ब्रह्मविचारं कुरु । चिदचिद्विवेचनं कुरु । कल्याणमयं चैतन्यघनं निजरूपं निश्चिनु । तथाच सच्चि-

दानन्दस्वरूपं भव। द्वन्द्वमोहं त्यज। विश्रान्तिं भज। विचारे सति, आत्मनोऽद्वितीयत्वे निश्चिते सति, त्याज्यमत्याज्यञ्च किमस्ति। इदं सर्वं दृश्यात्मकं जगत्तत्त्वतस्त्वत्तो भिन्नं नैवास्ति।

"मनोमात्रमिदं द्वैतं यथा मरुमरीचिका"।

इति गृहाण। अतो द्वैतनिमित्तकं भयं मा कार्षीः।

"द्वितीयाद्वै भयं भवति"।

इति श्रुतिर्वदति। द्वितीयं वस्त्वेव नास्ति तथाच तव कुतो भयप्रसङ्गः।

रे मुमुक्षुमनः ! त्वं भूमानन्दं वेदान्तवेद्यमद्वैतमात्मानं साक्षात्कुरु। धनपुत्रदेहादिष्वात्मात्मीयत्वबुद्धिमुत्सृज। भेदनिबन्धनं सुखदुःखादिकं मूलतस्त्यज। अहं ममेति देहदेहीयेष्वभिमानं विहाय निरुपाधिकनित्यशुद्धबुद्धमुक्तसतत्त्वं भव। तथाच निरुपाधिकपदनिष्ठया कृत्यमकृत्यं धर्ममधर्मञ्चातिगच्छ। विधिनिषेधकिङ्करतामत्येहि। यावद्धर्माधर्मपराधीनता, तावत्संसारिणः संसारित्वं न नश्यति। ततो देवपशुत्वं दूरतः परित्यज्य देवपूज्यं

भव । आत्मानमप्रमेयमपरिच्छिन्नं सर्वसंसारस्पर्शशून्यं सम्यग्ज्ञात्वा निर्वृत्तं भव ।

"ब्रह्मविद् ब्रह्मैवभवति"।

"मुण्डकोपनिषत्"

इति श्रुत्युक्तप्रकारेण ब्रह्मविद्यया स्वयं ब्रह्मी भव । अथ ब्रह्मप्राप्त्या प्राप्तप्राप्तव्यः कृतकृत्यो धन्यो मान्यो जीवन्मुक्तश्च विराजस्व । नित्यनिरतिशयानन्दप्राप्त्या नित्यनिरङ्कुशतृप्तिमान् भव ।

"धन्योऽहं धन्योऽहं नित्यं स्वात्मानमञ्जसा वेद्मि ।
धन्योऽहं धन्योऽहं ब्रह्मानन्दो विभाति मे स्पष्टम् ॥
धन्योऽहं धन्योऽहं दुःखं सांसारिकं न वीक्षेऽद्य ।
धन्योऽहं धन्योऽहं स्वस्याज्ञानं पलायितं क्वापि ॥
धन्योऽहं धन्योऽहं कर्तव्यं मे न विद्यते किञ्चित् ।
धन्योऽहं धन्योऽहं प्राप्तव्यं सर्वमद्य सम्पन्नम् ॥
धन्योऽहं धन्योऽहं तृप्तेर्मे कोपमा भवेल्लोके ।
धन्योऽहं धन्योऽहं धन्यो धन्यः पुनःपुनर्धन्यः ॥"

"पञ्चदशी"

इत्युच्चैस्तरामनारत, मानन्दोद्गारं कुरु । त्रिगुणात्मकमिमं संसारमतीत्य निस्त्रैगुण्ये पथि स्वच्छन्दं विचर ।

"अहं मनुरभवं सूर्यश्चेति" ।

"बृहदारण्यक०"

"अहमन्नमहमन्नमहमन्नम् ।
अहमन्नादोऽहमन्नादोऽहमन्नादः" ॥

"तैत्तिरीय०"

इत्यादिश्रुतिनिगदितं सर्वात्मभावमत्रैवाप्नुहि ।

अपिच लोकातीतं स्थानमिच्छँस्त्वं लोकविलक्षणो भव । आत्मनिष्ठ आत्माराम आत्मतृप्त आत्मसन्तुष्टश्च भूत्वा सकलां पृथ्वीं पुनीहि ।

"कुलं पवित्रं जननी कृतार्था
विश्वम्भरा पुण्यवती च तेन ।
अपारसंवित् सुखसागरेऽस्मिन्
लीनं परे ब्रह्मणि यस्य चेतः ॥"

इत्येतां देवदुर्लभां महनीयां दशां प्राप्नुहि । ब्रह्मनिष्ठया ब्रह्मीभूतमतएवानन्दमग्नं मत्तहस्तिनमिवानन्दमद-

मत्तं त्वां निन्दास्तोत्रे किं करिष्यतः। मानामानौ त्वां कथं विचालयिष्यतः। अविषमदृष्टिं त्वां लोकः कथं विचालयेत्; कथञ्च विकारयेत्। स्वमहिमप्रतिष्ठं मदमत्तमिभराजमभीरुं भषकभषणानीव भाषकभाषणानि कटुतराणि निन्दापराणि चाश्राव्याणि न व्यथयितुमलं स्युः। लोकस्तावत्तवानुकूलतया प्रतिकूलतया वा यथेष्टं विचेष्टताम्; द्वन्द्वातीतस्याद्वन्द्वपदमधिरूढस्य तव तेन को लाभः का वा हानिः। अनुकूलप्रतिकूलभावस्त्वज्ञान मूलकः। सर्वेऽपि भेदव्यवहारा लौकिकाः शास्त्रीयाश्चाज्ञानमूलकाः। त्वं तु निरस्ताज्ञानो ज्ञानस्वरूपः। तथा च त्वयि कथं भेदबुद्धिस्तन्निबन्धनोऽनुकूलप्रतिकूलभावश्च सङ्घटेत। अयं मम बन्धुः; अयं मम सुहृत्; अयन्तु मम शत्रुः; अयं मम निन्दकः; अयमभेदवादी; अयन्तु भेदवादी; अयं शैवः; अयं वैष्णवः; अयं शाक्तः; अयं वैदिकः; अयन्त्ववैदिकः; अयमास्तिकः; अयन्तु नास्तिक इत्यादयो नानात्वव्यवहारा अविद्याप्रत्युपस्थापिताः सर्वातीतं सर्वात्मभावं गतमविद्यास्पर्शशून्यं त्वां कथं स्प्रष्टुमर्हा भवेयुः।

त्वं ज्ञानेन सर्वं त्यक्त्वा सर्वं भूत्वा च साक्षाच्छम्भु-

र्भव। इदं सकलं जगज्जलबुद्बुदवद्वाचारम्भणमात्रमनुपश्य। त्वमनारतमनात्मतिरस्करणेनानुपाधिकआत्मनि तिष्ठ। तव को वा मोहः को वा शोकः? अनुपाधिकाद्वैतदृशस्तव कुतः शोकमोहादिप्रसङ्गः। त्वं सहजावस्थायां वस। त्वं भावातीतो भव। अभावातीतश्च भव। अयं प्रपञ्चो बहिर्मुखानां क्षणिकतुष्टिकरः; त्वन्तु यद्यन्तर्मुख आत्मारामस्तव कथमयं तुष्टिहेतुः स्यात्। आत्मनिष्ठो भूत्वा निरङ्कुशां तुष्टिमाप्नुहि; यत्र सातिशयत्वादिदोषाः किञ्चिदपि न सन्ति।

अथ येनैतादृशी सहजावस्था, एतादृशं ब्रह्मपदं प्राप्यते, तज्ज्ञानं कथं सिद्ध्यतीतिचेच्छृणु त्वमवहितो भूत्वा। गुरोरनुग्रहादेव ज्ञानमुत्पद्यते पुंसाम्। देशिकानुग्रहमन्तरेण न ब्रह्मविद्या सम्भवति। तस्माद्ब्रह्मात्मविद्याग्रहणार्थं ब्रह्मविदं गुणनिधिं गुरुमुपगच्छ।

"परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो
निर्वेदमायान्नास्त्यकृतः कृतेन।
तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्
समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्॥"

"मुण्डकोपनिषत्"

"आचार्यवान् पुरुषो वेद"

"छान्दोग्योपनिषत्"

इत्याद्याः श्रुतयो गुरूपसत्तेरवश्यकर्तव्यतामुपदिशन्ति। य उपसन्नस्य शिष्यस्याज्ञानान्धकारं भास्वता ज्ञानदीपेन नाशयति; तथाच संसारतापतप्तं तं संसारपारं प्रापयति, स गुरुरिति जानीहि ।

उक्तं हि गुरोर्लक्षणम्:—

"उपसीदेद्गुरुं प्राज्ञं यस्माद्बन्धविमोक्षणम् ।
श्रोत्रियोऽवृजिनोऽकामहतो यो ब्रह्मवित्तमः ॥
ब्रह्मण्युपरतः शान्तो निरिन्धन इवानलः ।
अहेतुकदयासिन्धुर्बन्धुरानमतां सताम् ॥" इति ।

"विवेकचूडामणिः"

एतादृशलक्षणयुतं गुरुमुपगम्य प्रणामशुश्रूषणादिभिस्तं प्रसादय । तमेवं प्रसाद्यानवद्यामात्मविद्यां पृच्छ । तत्प्रसादात्तन्मुखादात्मविद्यां गृहाण ।

तदुक्तम्:—

"तमाराध्य गुरुं भक्त्या प्रह्वप्रश्रयसेवनैः ।

प्रसन्नं तमनुप्राप्य पृच्छेज्ज्ञातव्यमात्मनः॥" इति।

"विवेकचूडामणिः"

"तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्वदर्शिनः॥" इति च

"श्रीमद्भगवद्गीता"

एवं गुरुकटाक्षादेव तत्वज्ञानोदयस्तद्दार्ढ्यश्चेति विद्धि। अतो गुरौ श्रद्धां कृत्वा गुरुमुखाद्वेदान्तान् शृणु। केवलतर्केण हि तत्त्वनिश्चयः केनाऽपि कर्तुं न शक्यते।

"नैषा तर्केण मतिरापनेया"

इति हि काठकश्रुतिः। तस्माद्गुरुचरणयोर्वेदान्तेषु च श्रद्धां विधेहि प्रथमतः। गुरुशास्त्रयोः श्रद्धा हि ज्ञानस्य मूलकारणम्। गुरुशास्त्रयोः श्रद्धां विना शतकोटिजन्मभिरपि न स्वयं ज्ञानमुत्पत्तुं प्रभवति।

"आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापतीति।"

"छान्दोग्य०"

"श्रद्धाभक्तिध्यानयोगादवेहि"

"कैवल्य०"

"श्रद्धावाँल्लभते ज्ञानम्"

"भगवद्गीता"

इत्यादीनि श्रुतिस्मृतिवचनानि शतशः श्रद्धाया महत्वं प्रदर्शयन्ति । ततः श्रद्धया गुरुमुखाद्वेदान्तान् श्रुत्वा तदर्थविचारं कुरु । एवं वेदान्तश्रवणस्योपकारकत्वेन सन्यासश्चावश्यं विधेयो विद्यते । यदि दण्डधारणाद्याश्रमरूपः सन्यासः कर्तुं न शक्यते, तर्हि काम्यकर्मादित्यागरूपः सन्यासः खलु कर्तव्यः । आश्रमरूपः सन्यास एव हि सर्वैः शुश्रूषुभिः श्रवणाङ्गत्वेन कर्तव्य इति न कश्चिन्नियमोऽस्ति ।

तदुक्तम् :—

"अयञ्च वेदनहेतुः सन्यासो द्विविधः, जन्मापादककाम्यकर्मादित्यागमात्रात्मकः प्रैषोच्चारणपूर्वकदण्डधारणाद्याश्रमरूपश्चेति ।"

"ब्रह्मचारिगृहस्थवानप्रस्थानां केनचिन्निमित्तेन सन्यासाश्रमस्वीकारे प्रतिबद्धे सति स्वाश्रमधर्मेष्वनुष्ठीयमानेष्वपि वेदनार्थो मानसः कर्मादित्यागो न विरुध्यते ।" इति

"जीवन्मुक्तिविवेकः"

एवमङ्गभूतं सन्यासमपि सम्यक् कृत्वा यथाविधि वेदान्तश्रवणे नितरां प्रवर्तस्व। तथाचोपनिषदां सर्वासामपि तात्पर्यं ब्रह्मात्मैक्यविषय इति निश्शङ्कं निश्चिनु। अपौरुषेयत्वादुपनिषदः खलु निर्दोषाः स्वतः प्रमाणभूता इति विद्धि। ताः सर्वा अप्यैककण्ठ्येनैदम्पर्येण ब्रह्मात्मैकत्वमुपदिशन्ति चेत्, तत् सत्यात्सत्यतरमबाद्ध्यमिति श्रद्धत्स्व। एवं वेदान्तवाक्यैः श्रुतस्य ब्रह्माभिन्नप्रत्यगात्मरूपस्यार्थस्य सम्यग्युक्त्या सम्भाविता चिन्तनं मननम्। श्रवणानन्तरमस्मिन्मनने प्रवर्तस्व। ततः परं तस्मिन्नर्थे सजातीयमनोवृत्तिप्रवाहकरणात्मकं निदिद्ध्यासनं कुरु।

तदुक्तम्:—

"इत्थं वाक्यैस्तदर्थानुसन्धानं श्रवणं भवेत्।
युक्त्या सम्भावितत्वानुसन्धानं मननं तु तत्॥
ताभ्यां निर्विचिकित्सेऽर्थे चेतसः स्थापितस्य यत्।
एकतानत्वमेतद्धि निदिद्ध्यासनमुच्यते।" इति

"पञ्चदशी"

आदरेण नैरन्तर्येण दीर्घकालमेवं श्रद्धापुरःसरमनि-

र्विण्णभावेनाभ्यासं कुरु । एवं श्रवणमनननिदिध्यासनाभ्यासेन निजस्वरूपं नित्यशुद्धमपरोक्षङ्कुरु । तथाचाविद्ययाऽऽत्मनि कल्पितां कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वादिभ्रान्तिं परित्यज । आत्मा तु तत्त्वतोऽकर्त्ताऽभोक्ताऽसंसार्यस्ति, निराकारो निरवयवो निर्विकारो निर्विशेषोऽस्ति, पुण्यपापविवर्जितोऽस्ति, जन्मजरामरणादिविवर्जितोऽस्ति ।

तदुक्तम् :—

"स पर्यगाच्छुक्रमकायमव्रण-
मस्नाविरꣳशुद्धमपापविद्धम् ।"

"ईशा०"

"अशरीरं शरीरेष्वनवस्थेष्ववस्थितं
महान्तं विभुमात्मानं मत्त्वा धीरो न शोचति ॥"

"कठ०"

"अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः ।"

"मुण्डक०"

"अशब्दमस्पर्शमरूपमव्ययं
तथारसं नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महतः परं ध्रुवं
निचाय्य तं मृत्युमुखात् प्रमुच्यते ॥"

"कठ०"

"अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेह-
मच्छायमतमोऽवाय्वनाकाशमसङ्गमरसमगन्ध-
मचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राण-
ममुखममात्रमनन्तरमबाह्यम् ।"

"बृहदारण्यक०"

"अपाणिपादो जवनो ग्रहीता,
पश्यत्यचक्षुः स शृणोत्यकर्णः ।"

"श्वेता०"

"नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
नचैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥
न जायते म्रियते वा कदाचि-
न्नायं भूत्वा भविता वा न भूयः ।

अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥" इत्यादि

"श्रीमद्भगवद्गीता"

आत्मा सत्यस्वरूपोऽस्ति । त्रिषु कालेष्वपि एकरसतया वर्तमानोऽस्ति । त्रिषु कालेषु यो न बाध्यते स आत्मेति विजानीहि । शरीरेषु विनश्यत्स्वप्यविनश्यन् यो वर्तते, स आत्मेति विजानीहि ।

एवमात्मा चैतन्यरूपोऽस्ति । जाग्रत्स्वप्नसुषुप्तिषु सर्वदैकरसतया स्फुरणरूपोऽस्ति । तथा युगकल्पादिष्वप्यविच्छिन्नबोधरूपेण प्रकाशमानोऽस्ति । यस्य भासा सर्वमिदं सूर्यचन्द्रनक्षत्रादिकं जगद्भाति, स आत्मेति विद्धि ।

एवमात्माऽऽनन्दस्वरूपोऽस्ति । यत आत्मा सर्वेषां परमप्रेमास्पदमस्ति । यः सर्वेषां निरतिशयप्रेमविषयः, अतएव निरतिशयानन्दघनः स आत्मेति गृहाण ।

"सत्यं ज्ञानमनन्तं ब्रह्म"

"तैत्तिरीय०"

"सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्"

"छान्दोग्य०"

"प्रज्ञानं ब्रह्म"

"ऐतरेय०"

"विज्ञानमानन्दं ब्रह्म"

"बृहदारण्यक०"

"एवं स्थानत्रयेऽप्येका संवित्तद्वद्दिनान्तरे ।
मासाब्दयुगकल्पेषु गता गम्येष्वनेकधा ॥
नोदेति नास्तमेत्येका संविदेषा स्वयं प्रभा ।
इयमात्मा परानन्दः परप्रेमास्पदं यतः ॥
मा न भूवं हि भूयासमिति प्रेमात्मनीक्ष्यते ।"

"पञ्चदशी"

इत्यादयः श्रुतिस्मृतयः शतशो ब्रह्मात्मनः सच्चिदानन्दरूपतां सङ्गिरन्ते ।

नन्वात्मनः सत्त्वे चित्त्वेऽपि तस्यानन्दरूपत्वं कथम् ?

विषयाः खलु स्रक्चन्दनवनितादयः सुखप्रदाः सुखरूपाश्चेति लोके प्रसिद्धमिति चेच्छृणु । रे मूढ! महामूढा एव विषयाः सुखरूपा इति गृह्णन्ति । विवेकिनस्त्वात्मानमेव सुखरूपं मन्यन्ते । कथम्? आत्मा तु सर्वेषां प्राणिनां निरतिशयप्रेमविषय इति निर्विवादम् । अन्येषु कलत्रपुत्रादिषु विषयेषु विषयिणां यत्प्रेम तदात्मशेषतया भवति । अन्येषु हि यत्प्रेम तदात्मार्थमस्ति । आत्मनि तु यत्प्रेम तदन्यार्थं न भवति । तस्मादात्मा निरुपाधिकप्रेमाश्रय इति सर्वप्रत्यक्षतया सिद्ध्यति । आत्मसम्बन्धितयैव स्वरूपतोऽप्रियमप्यनात्मभूतं विषयजातं प्रियायते लोकस्य ।

तदुक्तं वार्तिककारैः—

"स्वतोऽखिलोऽप्रियोऽनात्मा प्रत्यङ्मोहैकहेतुतः ।
प्रत्यगाऽऽह्लादकारित्वादप्रियोऽपि प्रियो मतः॥" इति

अतो निरतिशयप्रेमास्पदत्वादात्मा निरतिशयसुखस्वरूप इति निर्विवादोऽयं राद्धान्तः । विषयेषु विषयिभिर्यत्सुखमनुभूयते तदप्यात्मस्वरूपभूतं सुखमिति जानीहि ; अनात्मभूतानां स्वतो दृष्टनष्टप्रनष्टस्वभावानां

दुःखरूपाणां तेषां सुखस्वरूपत्वासिद्धेः। विषयभोगतः शान्तदशामाटीकमानायां चित्तवृत्तौ स्वरूपसुखमेव नूनं स्फुरति, यद्विषयसुखमिति व्यवह्रियतेऽविवेकिभिः। यथा शुष्काणि नीरसान्यस्थीनि दन्तैर्विचूर्णयन् सारमेयो दन्तच्छिद्रनिस्सृतं स्वकीयं रक्तमास्वाद्यास्थिसम्बन्धि तदित्यभिमन्यते; तथा विषयभोगद्वारा स्वस्वरूपभूतं सुखमेवानुभूय विषयसम्बन्धि तदित्यहो! विपरीतं गृह्णन्ति मूढाः। तथा चात्मातिरिक्तेष्वापातरमणीयेषु विषयेषु गन्धर्वनगरीतुल्येषु हन्त! हन्त! ते सुखमिच्छन्ति, तत्रातिमात्रमनुरक्ता भवन्ति च। ततश्च महति दुःखगर्ते मोहाद्गजा इव पतन्ति च। विवेकिनस्तु स्वस्वरूपभूतमेव सुखं, नान्यत्र विषयेषु किञ्चिदपि सुखमस्ति; ते सततं सर्वथा दुःखरूपा एवेति सम्यग् ज्ञात्वा तेषु काकविष्ठावद् दृढतरं वैराग्यमास्थायाऽऽत्मारामा आत्मनिष्ठाश्च भवन्ति। अस्मिन्नर्थे बृहदारण्यकस्थां प्रसिद्धामिमामाख्यायिकां न्यायोपबृंहितामादरेण शृणु।

पुरा किल मिथिलाधिपस्य श्रीजनकस्य राजर्षेर्गुरुर्याज्ञवल्क्यो नाम विद्यातपआदिषु गुणेष्वद्वितीयो ब्रह्मर्षिरा-

सीत् । तस्य मैत्रेयी कात्यायनी चेति द्वे भार्ये आस्ताम् । एकदा याज्ञवल्क्यः शिष्टां विशिष्टविद्यावतीं श्रेष्ठां ज्येष्ठभार्यां मैत्रेयीमामन्त्र्येदमब्रवीत् । "यदहं गार्हस्थ्यं त्यक्त्वा प्रव्रज्यां चिकीर्षुरस्मि । तदर्थं तवानुज्ञां प्रार्थये । कात्यायन्या सह तव सपत्नीतया यो धनादिना सम्बन्धोऽस्ति, तस्य विच्छेदं कर्तुमिच्छामीति ।" एवमुक्ता मैत्रेयी याज्ञवल्क्यं स्वपतिमब्रवीत् । "भो भगवन् ! यदीयं सर्वा पृथ्वी धनेन पूर्णा मम स्यात् तदा किं तेनाहं मुक्ता भवेयमिति । तच्छ्रुत्वा सुप्रसन्नः स्वप्रियां प्रत्युवाच याज्ञवल्क्यः । "अरे मैत्रेयि ! वित्तेन त्वमृतत्वस्याशा नास्ति ; उपकरणवतां यादृशं जीवितं स्यात्, तादृशं तवाऽपि स्यादिति । एतन्मुनिवचनमाकर्ण्य मैत्रेयी पुनरप्युक्तवती । "भो भगवन् ! यद्भवन्तोऽमृतत्वसाधनं जानन्ति, तदेव मे ब्रूहि । भोगैश्वर्यसाधनं संसारहेतुमन्यद्वित्तमहं न काङ्क्षे" इति । इदं मैत्रेय्या धीरं प्रगल्भञ्च वचनं वार्तिककारैरित्थं स्पष्टीक्रियते ।

"अनुरक्तां प्रियां साध्वीं बद्ध्वा वित्तेन मां कथम् ।
कामोच्छित्तिमकृत्वा च सन्यसन्ति भवद्विधाः ॥

"वित्ताच्चेदमृतत्वं स्यात्तत्तितिक्षानयुज्यते ।
वित्ताच्चेन्नामृतत्वं स्याद्ब्रूद तेन ममापि किम् ॥
स्वभावादेव साधूनां प्रवृत्तिरुपकारिणी ।
अपकारिण्यपि जने किमु भक्तजनं प्रति ॥" इति

मैत्रेयीवचनमिदमुपश्रुत्यातिप्रमोदमवाप याज्ञवल्क्यः; मन्दस्मितविकसितश्चाभूत्तस्य मुखम् । अहो ! दृष्टानुश्रविकविषयेषु देवानामपिदुर्लभं भामिन्या वैराग्यम् । तीव्रामात्मतत्त्वजिज्ञासां दृष्ट्वा स तुष्टीभूय तस्यै तत्त्वमुपदेष्टुमारभते स्म ।

"नवा अरे पत्युः कामाय पतिः प्रियो भव-
त्याऽऽत्मनस्तु कामाय पतिः प्रियो भवति ।
नवा अरे जायायै कामाय जाया प्रिया भव-
त्याऽऽत्मनस्तु कामाय जाया प्रिया भवति ।
नवा अरे पुत्राणां कामाय पुत्राः प्रिया भव-
न्त्याऽऽत्मनस्तु कामाय पुत्राः प्रिया भवन्ति ।
नवा अरे सर्वस्य कामाय सर्वं प्रियं भव-
त्याऽऽत्मनस्तु कामाय सर्वं प्रियं भवति ॥"

एवं पतिर्जाया पुत्रा वित्तमित्यादयः सर्वेऽपि विषया आत्मार्थं प्रियाः, आत्मा तु निरुपाधिकः प्रियः । तस्मात्

"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"

इत्युपदिश्य मुनिरुपरराम ।

एवमनतिशायप्रेमास्पदत्वादनतिशयानन्दस्वरूप आत्मेति शतशः श्रुतिस्मृतिन्यायवादाः प्रवृत्ताः । तथा च सच्चिदानन्दरूपत्वमात्मनः स्वरूपलक्षणमिति विद्धि । प्रतिक्षणपरिणामिन्यस्मिन् शरीरेऽपरिणामितया कूटस्थरूपेण यो वर्तते, स आत्मा । जन्मनः प्राक् ततः पश्चात् बाल्ये कौमारे यौवने वार्द्धक्ये च मरणादूर्द्ध्वञ्च शरीरस्य, शरीरवदवस्थान्तरमप्राप्यैवैकरसो योऽवतिष्ठते स आत्मा। तर्हि कथं न दृश्यते आत्मा शरीरवत्सर्वैरिति चेदत्यल्पमिदमुच्यते। आकाशादपि सूक्ष्मतरत्वान्निर्गुणत्वादतीन्द्रियत्वान्नकस्यापीन्द्रियस्य गोचरो भवत्यात्मा ।

तदुक्तम्—

“यद्वाचानभ्युदितं येन वागभ्युद्यते ।
यन्मनसा न मनुते येनाहुर्मनो मतम् ।
यच्चक्षुषा न पश्यति येन चक्षूꣳषि पश्यति ।
यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदꣳ श्रुतम् ।
यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते ॥” इति

“केन०”

एवमक्षैरन्तःकरणेन चात्मनोऽगृह्यमाणत्वेऽपि न स नास्तीति । अस्त्येव सः । कथम् ?

“येन रूपं रसं गन्धं शब्दान्स्पर्शाꣳश्च मैथुनान् ।
एतेनैव विजानाति किमत्र परिशिष्यत एतद्वैतत् ॥

“कठ०”

इति श्रुत्युक्तरीत्या योऽस्मिन्देहे बुद्धिगुहायामवस्थितः सन् बाह्यान् शब्दस्पर्शरूपरसगन्धादिवृत्तिभेदांस्तथाऽऽन्तरान् कामक्रोधलोभभयादिवृत्तिभेदान् तदभावञ्च प्रकाशयति स आत्मा । सोऽस्त्येव । आत्मा दृश्यरूपेण न प्रकाशते । तथाऽप्रकाशमानोऽपि दृग्रूपेण स सदा स्वयं

प्रकाशत एव । यथा नेत्रश्रोत्रादीनि, स्वस्वविषयान् प्रकाशयन्ति परं तैस्तानि न प्रकाश्यन्ते, एवमात्मा दृग्रूपः सर्वमपि दृश्यजातं प्रकाशयन्नपि न तेन स दृश्यते, तथाऽपि तस्यासत्ता न शङ्कितुं योग्या ।

किञ्च तूष्णीमवस्थायां सुषुप्तौ समाधौ च विक्षिप्तवृत्तेरभावात् स्वस्वरूपसुखरूपतया य आभाति स आत्मा। सोऽस्त्येव ! अहो ! यथा सुवर्णनिधेरुपरि गच्छन्तोऽपि जनास्तं निधिं न जानन्ति, तथाऽहरहः सुषुप्तौ सुखरूपमात्मानमनुभवन्तोऽपि मूढास्तं न जानन्तीति । प्रतिदिनं सर्वजनसाधारणतयाऽऽत्मानुभवेऽप्यात्माऽननुभवः प्रत्यपादि सानुक्रोशं छान्दोग्यश्रुत्या ।

आत्मन एवमसङ्गसच्चिदानन्दरूपत्वेऽपि मूढास्तन्न जानन्ति । अज्ञानेनासङ्ग आनन्दघने नित्यशुद्धबुद्धमुक्तस्वभावे स्वात्मनि देहेन्द्रियमनआदीन् तद्धर्मान् स्थूलत्वकृशत्वबधिरत्वान्धत्वकर्तृत्वभोक्तृत्वसुखित्वदुःखित्वादींश्चाध्यस्यन्ति । तथाचाहं स्थूलः कृशो बधिरोऽन्धः कर्ता भोक्ता सुखी दुःखीति हन्त ! हन्ताभिमन्यन्ते च । अज्ञानमेव तत्र कारणं नान्यत् किञ्चिदिति विद्धि । अज्ञानं

किंस्वरूपमिति चेच्छृणु । भावरूपमनिर्वाच्यमज्ञानमिति जानीहि । अज्ञानमेव माया अविद्याऽव्यक्तं प्रकृतिरित्यादिशब्दैर्बहुभिर्व्यपदिश्यते ।

तदुक्तम् :—

"अव्यक्तनाम्नी परमेशशक्ति-
रनाद्यविद्या त्रिगुणात्मिका परा ।
कार्यानुमेया सुधियैव माया
यया जगत्सर्वमिदं प्रसूयते ॥
सन्नाप्यसन्नाप्युभयात्मिका नो
भिन्नाप्यभिन्नाप्युभयात्मिका नो ।
साङ्गाप्यनङ्गाह्युभयात्मिका नो,
महाद्भुताऽनिर्वचनीयरूपा ॥" इति

"विवेकचूडामणिः"

अस्या अविद्यायाः कार्यभूत आत्माऽनात्मनोर्विरुद्धस्वभावयोरपीतरेतराध्यास एवानादिकालप्रवृत्तः सर्वसंसारानर्थस्य हेतुः । अभ्रो महान्तं भास्वन्तमिव धूलीपटलश्चाकाशमिवाथशैवालश्चजलमिवेयमविद्याऽऽत्मानमा-

श्रित्यजीवति, तमेव विषयीकरोति च । अत एवोक्तं श्रीसर्वज्ञमुनिभिः—

"आश्रयत्वविषयत्वभागिनी,
निर्विभागचितिरेवकेवला ।
पूर्वसिद्धतमसो हि पश्चिमो,
नाश्रयो भवति नाऽपि गोचरः" ॥ इति

"सङ्क्षेपशारीरकम्"

तथाच स्वकीययाऽऽवरणशक्त्याऽऽत्मानमावृत्येतरया विक्षेपशक्त्या भूतभौतिकात्मकमिदं जगत्सृजति सा रज्ज्वामिव भुजगम् । एवमविद्याया असङ्गे शुद्ध आत्मनि कार्यकरणात्मकस्य जगतः सर्जनमथवाऽविद्यया तत्र तस्याध्यासः सर्वव्यवहारस्याहंममेत्यादेर्मूलमिति जानीहि ।

तदुक्तमध्यासभाष्ये—

"युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ सिद्धायां तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिः, इत्यतोऽस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य

विषयस्य तद्धर्माणाश्चाध्यासः, तद्विपर्ययेण विषयिणस्तद्धर्माणां च विषयेऽध्यासो मिथ्येति भवितुं युक्तम्। तथाऽपि अन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्येतरेतराविवेकेन, अत्यन्तविविक्तयोर्धर्मधर्मिणोर्मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य—"अहमिदं" "ममेदमिति" नैसर्गिकोऽयं लोकव्यवहारः"। इति

"अध्यासो नामातस्मिंस्तद्बुद्धिरित्यवोचाम। तद्यथा—पुत्रभार्यादिषु विकलेषु सकलेषु वाऽहमेव विकलः सकलो वेति बाह्यधर्मानात्मन्यध्यस्यति। तथा देहधर्मान्—स्थूलोऽहं कृशोहं, गौरोऽहं, तिष्ठामि, गच्छामि लङ्घयामि चेति। तथेन्द्रिय धर्मान्—मूकः, काणः, क्लीबो, बधिरोऽन्धोऽहमिति। तथाऽन्तः-करणधर्मान्—कामसङ्कल्पविचिकित्साध्यवसायादीन्। एवमहं प्रत्ययिनमशेषस्वप्रचारसाक्षिणि प्रत्यगात्मन्यध्यस्य तञ्च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेणान्तः करणादिष्वध्यस्यति। एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्या प्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः"। इति च

इममध्यासमन्तरेण शास्त्रीयो लौकिकश्च प्रमाणप्रमे-

यादिव्यवहारः कोऽपि न सम्भवति। वस्तुतोऽविद्यमानं सद्विद्यमानमिव प्रतिभाति ग्राह्यग्राहकरूपमिदं जगदविद्यया। अहो! अविद्याया अघटितघटनापटीयस्त्वम्। सर्वोऽपिकर्तृकर्मक्रियाव्यवहारः प्रतीतिमात्रसत्ताको न वास्तविकः कथमपि किञ्चिदपि, वार्त्तमानिकचित्रचेष्टित (सिनेमा) वदथवा रज्जुसर्पविसर्पणवदिति सङ्गहतः सिद्धान्तं विद्धि।

एवं सर्वसंसारानर्थसार्थस्य बीजभूतं त्रिपुटीव्यवहारप्रवर्तकमिममविद्यारूपमध्यासमात्मैकत्वविद्यया विध्वंसय। अविद्या हि विद्ययैव विनाश्यते, नान्येन कर्मणा तपसा दानेन वा प्रवचनेन बहुश्रुतेन मेधाबलेन वा। यस्य कस्यचिद्वा पदार्थस्याज्ञानं तज्ज्ञानेनैव विनिवर्तते, नान्येन यज्ञेन जपेन स्तोत्रेण कीर्तनेन, तीर्थाटनादिना वेति प्रसिद्धतरं लोके शास्त्रे च।

उक्तं हि नैष्कर्म्यसिद्धौ श्रीसुरेश्वराचार्यचरणैः—

"वेदावसानवाक्योत्थ सम्यग्ज्ञानाशुशुक्षणिः।
दन्दहीत्यात्मनो मोहं न कर्माप्रतिकूलतः" ॥ इति

अथ "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थाना" मित्यादिसूत्रयता श्रीजैमिनिनाऽन्यैश्च तदनुवर्तिभिर्यदुक्तं वेदस्यानर्थक्यम् क्रियार्थत्वेऽथान्यच्चकर्मभ्यः कैवल्यमित्यादि "असदर्थप्रलापोऽय" मिति तैरेव तत्र तद्दूषितमिति विजानीहि। अतो वेदावसानवाक्योत्थया आत्मैकत्वविद्ययेमामनादिकालप्रवर्तमानामविद्यामाशु विनाशय। आत्मतत्त्वावधारणमेवाऽऽत्मैकत्वविद्या। प्रागुक्तैः श्रवणादिभिस्तामात्मविद्यां प्राप्नुहि। श्रवणादीनां निरन्तराभ्यासेन संशयभावनां विपरीतभावनाञ्च निवर्तय। यावत्संशयो विपर्ययश्च तावदात्मनिश्चयो न भवति, तस्मात्पुनः पुनः श्रवणेन प्रमाणगतं संशयं छिन्धि। सर्वेषां वेदान्तानामैदंपर्यं प्रत्यगभिन्नब्रह्मणीति निश्चिनु। "सर्वे वेदा यत्पदमामनन्ती"त्यादिश्रुतिभ्यः सर्वेषां वेदानां परम्परया साक्षाद्वा ब्रह्मात्मनि समन्वय इति सम्यगवधारय। तथा वेदान्तवाक्यैरवधारितस्य तस्यार्थस्य मननेन प्रमेयगतं संशयं भिन्धि। अथ तस्य निदिध्यासनेन च कर्तृत्वभोक्तृत्वादिरूपां विपरीतबुद्धिं विनाशय।

एवमसकृदनुष्ठीयमानैः श्रवणादिभिः संशयादिभाव-

नामपनीय दृढतरामात्मविद्यां प्राप्य पूर्वोक्तमध्यासं समूलमपाकुरु ।

त्वं तु स्वरूपतोऽकर्त्ताऽसि, अभोक्ताऽसि, अशरीरोऽसि, अनिन्द्रियोऽसि, सुखदुःखादिरहितोऽसि, शोकमोहादिषडूर्मिरहितोऽसि । एवं त्वं वस्तुतोऽसंसार्यसि । तथाऽपि हन्त ! हन्त ! रे चित्त ! त्वमविद्यया संसारित्वमनुवर्त्तसे । स्वस्मिन्नविद्ययाऽध्यारोपितमिदं संसारित्वमसंसारिब्रह्मविद्ययैव समूलमुन्मूलनीयमित्यस्मिन्नर्थे सम्प्रदायविदा द्रविडाचार्येण प्रोक्तां भाष्यकारेणानूदितांश्चेमामाख्यायिकां श्रृणु सावधानम् ।

"कश्चित्किल राजपुत्रो जातमात्र एव मातापितृभ्यामपविद्धो व्याधगृहे संवर्धितः सोऽमुष्य वंशतामजानन् व्याधजातिप्रत्ययो व्याधजातिकर्माण्यनुवर्तते । यदा पुनः कश्चित्परमकारुणिको राजपुत्रस्य राजश्रीप्राप्तियोग्यतां जानन्नमुष्य पुत्रतां बोधयति, न त्वं व्याधोऽमुष्य राज्ञः पुत्रः कथञ्चिद्व्याधगृहमनुप्रविष्ट इति । स एवं बोधितस्त्यक्त्वा व्याधजातिप्रत्ययकर्माणि पितृपितामहप्रपितामहाद्यनुगतामात्मनः पदवीमनुवर्तते राजाऽहमस्मीति । तथा किलायं पर-

स्मादग्निविस्फुलिङ्गादिवत् तज्जातिरेव विभक्त इह देहेन्द्रियादिगहने प्रविष्टोऽसंसारी सन्नपि देहेन्द्रियादिसंसारधर्ममनुवर्तते, देहेन्द्रियादिसङ्घातोऽस्मि, कृशः स्थूलः सुखी दुःखीति परमात्मतामजानन्नात्मनः। न त्वमेतदात्मकः परमेव ब्रह्माऽस्य संसारीति प्रतिबोधित आचार्येण हित्वैषणात्रयानुवृत्तिश्च ब्रह्मैवास्मीति प्रतिपद्यते।" इति

"बृहदारण्यकभाष्यम्"

एवं वस्तुतोऽसंसारिपरमात्मस्वरूपो जीवस्तथाऽपि देहेन्द्रियादिसङ्घातसम्बन्धेन परमात्मभिन्न इव संसारीव प्रतिभाति। परमात्मा जीवात्मेत्युपाधिनिमित्तको भेदो न पारमार्थिकः। तथाऽपि तदेकत्वमविद्यामोहिता नजानन्ति। अहं संसारी सुखी दुःखीत्यात्मानमभिमन्यन्ते च। अहो! अविद्याया बुद्धिभ्रामणचातुरी।

तत्त्वमसीत्याद्युपनिषद्गतमहावाक्यानां सम्यग्विचारेणेममविद्यामोहमहिमानं विनाशय। ननु महावाक्यं किमिति चेज्जीवपरयोरैक्यप्रतिपादकं वाक्यं महावाक्यमिति तल्लक्षणं जानीहि। "तत्त्वमसी"ति नवकृत्वः

श्वेतकेतुं प्रत्युद्दालकप्रतिबोधनरूपेण सामवेदान्तर्गतच्छान्दोग्योपनिषदुपदिशति । तत्र मायाशबलं सर्वेश्वरं सर्वज्ञं सर्वशक्तिमदपरतन्त्रमसंसारि जगत्सृष्टिस्थितिसंहारकर्तृ ब्रह्म तत्पदेन कथ्यते । देहेन्द्रियपञ्जरमध्यबद्धोऽविद्याशबलोऽल्पज्ञोऽल्पशक्तिः संसारी परतन्त्रः श्रोता जीवस्त्वम्पदेनेर्यते । तयोरैक्यमसिपदेन बोध्यते । तथा चोपाधिविशिष्टौ परजीवौ तत्त्वम्पदयोर्वाच्यार्थौ । तयोस्तु परस्परवैलक्षण्यात्तेजास्तिमिरवदैक्यं न कथमपि सम्भवि । तस्मात्तयोरुपाधी वैलक्षण्यहेतू मायाविद्ये परित्यज्य निरुपाधिके शुद्धे चैतन्यमात्रे गृह्येते, लक्षणावृत्त्या । तथाच तयोः सलक्षणयोरैक्यं नासम्भवि । इयं लक्षणा खलु भागत्यागलक्षणेत्युच्यते । अनया भागत्यागलक्षणया "सोऽयंदेवदत्तः" इति वाक्यवत् "तत्वमसी"ति वाक्यमपि परमात्मप्रत्यगात्मनोरुपाधिरहितयोरेकत्वमथवाऽखण्डसच्चिदानन्दं भेदत्रयविवर्जितं प्रत्यगभिन्नं परं ब्रह्म बोधयति । प्रत्यगभिन्नमेकमेवाद्वितीयमद्वैतं ब्रह्म तत्त्वमसीति महावाक्यस्यार्थ इति निष्कर्षः । संसर्गो वा विशिष्टो वा वाक्यार्थो न सम्भवत्यास्मिन् वाक्ये। अखण्ड एव वाक्यार्थ इति विद्धि । एवं "प्रज्ञानं ब्रह्म"

"अहं ब्रह्मास्मि" अयमात्मा ब्रह्म" इत्यृग्वेदयजुर्वेदाथर्ववेदान्तर्गतानि महावाक्यान्यपि भागत्यागलक्षणयाऽखण्डसच्चिदानन्दं परं ब्रह्मैव तात्पर्येण बोधयन्ति।

एवं वेदान्तगतमहावाक्यविचारेणाखण्डार्थनिश्चयं कुरु। स्वस्य कूटस्थब्रह्मरूपतामवेहि। स्वस्यासंसारितामशरीरतां षड्भावविकारशून्यताञ्चानुभव बाढम्। तथाचाहं परस्माद्भिन्नः संसारी सुखी दुःखी जनिष्ये मरिष्यामीत्यादिभ्रान्तिमपनय।

उक्तं हि—

"यच्चकास्त्यनपरं परात्परं,
प्रत्यगेकरसमात्मलक्षणम्।
सत्यचित्सुखमनन्तमव्ययं,
ब्रह्मतत्त्वमसि भावयात्मनि॥" इति

"विवेकचूडामणिः"

उपाधिसम्बन्धादात्मनः संसारित्वमुपाधिविलयाच्चात्मनोऽसंसारित्वम्। तस्माद्विचारेणोपाधिं विलापय। उपाधिविलापनेन निरुपाधिकब्रह्मरूपो भव।

शरीरत्रयमात्मन उपाधिरिति जानीहि । शरीरत्रयसम्बन्धादात्मा सोपाधिकः संसारी भवति । स्थूलं सूक्ष्मं कारणमिति त्रीणि शरीराणि । स्थूलभूतकार्यमिदं दृश्यमानं भोगायतनं स्थूलशरीरमुच्यते ।

पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् ।
अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम्"
"आत्मबोधः"

इति सप्तदशतत्त्वात्मकं सूक्ष्मशरीरं विद्धि । अनादिरविद्या च कारणशरीरम् । इदं शरीरत्रयमेव पञ्चकोशात्मकतया तत्र तत्र वर्ण्यते । अन्नमयकोशात्मकं स्थूलशरीरम् । प्राणमयमनोमयविज्ञानमयकोशात्मकं तु सूक्ष्मशरीरम् । आनन्दमयकोशात्मकश्च कारणशरीरम् । एवं शरीरत्रयं पञ्चकोशात्मकं विद्धि । आत्मन्यारोपितमिदमुपाधिरूपं शरीरत्रयं विचारेण विलाप्य शरीरत्रयातीतो भव । शरीरसम्बन्धादेव जाग्रत्स्वप्नसुषुप्तिषु त्रिषु धामसु विश्वतैजसप्राज्ञनाम्ना सङ्क्रीडमानो नानारूपेण च नानाविधान्भोगान् भुञ्जानश्च जीवः संसारपथमनुवर्तमानो दृश्यते ।

तदुक्तं कैवल्यशाखायाम् :—

"स एव मायापरिमोहितात्मा,
शरीरमास्थाय करोति सर्वम् ।
स्त्रियन्नपानादिविचित्रभोगैः,
स एव जाग्रत्परितृप्तिमेति ॥
स्वप्ने स जीवः सुखदुःखभोक्ता
स्वमायया कल्पितजीवलोके ।
सुषुप्तिकाले सकले विलीने
तमोऽभिभूतः सुखरूपमेति" ॥ इति

तथाच शरीरत्रयसम्बन्धनिबन्धनमिदमवस्थात्रयमेव जीवस्य संसारः । अवस्थात्रयातीतो भव । तुर्यावस्थामास्थितो भव । तुर्यमेव तव पारमार्थिकं स्वरूपम् । तथाच तुर्यावस्थावस्थानेन संसारातीतो भव ।

एवं शरीरत्रयमवस्थात्रयञ्चातिक्रम्य स्वस्वरूपे नित्य शुद्धबुद्धमुक्त आनन्दी भव । ब्रह्मात्मभूतात्मा सन् सर्वभूतात्मभूतात्मा भव ।

"अहं ब्रह्मास्मि सर्वोऽस्मि शुद्धो बुद्धोऽस्म्यतः सदा ।

अजः सर्वत एवाहमजरश्चाक्षयोऽमृतः ॥
मदन्यः सर्वभूतेषु बोद्धा कश्चिन्न विद्यते ।
कर्माध्यक्षश्च साक्षी च चेता नित्योऽगुणोऽद्वयः ॥"

"उपदेशसाहस्री"

इति सततं सादरं भावय। शिवोऽस्मि, शान्तोऽस्मि, नित्योऽस्मि निरञ्जनोऽस्मि, अद्वयोऽस्मि, अविकारोऽस्मि, इति च नितान्तं चिन्तय।

"आत्माज्ञानाज्जगद्भाति आत्मज्ञानान्न भासते ।
रज्ज्वज्ञानादहिर्भाति तज्ज्ञानाद्भासते नहि ॥
अहो ! अहं नमो मह्यं दक्षो नास्तीह मत्समः ।
असंस्पृश्य शरीरेण येन विश्वं चिरं धृतम् ॥
बोधमात्रोऽह मज्ञानादुपाधिः कल्पितो मया ।
एवं विमृशतो नित्यं निर्विकल्पे स्थितिर्मम ॥"

"अष्टावक्रगीता"

इति च नितरां निर्विकल्पे पदे स्थितिं व्रज। सर्वदैव तत्त्वस्य चिन्तनं कथनमन्योन्यं तस्यैव प्रबोधनञ्च

कुरु । एवं निरन्तरतया ज्ञानाभ्यासेनाज्ञानतत्कार्यबाधनेन ज्ञाननिष्ठां लभस्व, यां लब्ध्वा ततोऽधिकमपरं लाभं न मन्यते मनुजः । ज्ञाननिष्ठया च जीवन्मुक्तो भव । ज्ञाननिष्ठापरिपाकेन जगतो मिथ्यात्वदर्शनदार्ढ्येन च निरिन्धनो वह्निरिव त्वं स्वयमेव शान्तिमेधि ब्रह्मणि, महासमुद्रे लवणशकलमिव च । तथाच सुदीर्घमेवं नितान्तशान्तं निर्विकल्पकं समाधिसुखमास्वादय । एवं क्रमशः–

"क्षीणायां वासनायां तु चेतो गलति सत्वरम् ।
क्षीणायां शीतसन्तत्यां ब्रह्मन् हिमकणो यथा ॥"

इति वसिष्ठादिष्टरीत्या वासनाजयेन चेतो नाशेन चोच्चां भूमिकामधिरुह्य तामधिवस । तथाच महाभाग्योदयं महादाक्ष्योदयं महोदयमात्मानमापादय ।

रे चित्त ! चिन्मये ब्रह्मणि नितरामेवं निमज्य चिन्मयं भव । वासनाधिक्यादेवं निमङ्क्तुमसमर्थश्चेत् सर्ववृत्तीनां हठतो निरोधात्मकेन समाधियोगेन तथा कर्तुं प्रयत्नमाधत्स्व । विषयाकारवृत्तीः साहसेन निरुन्धि । तत्र खेदं माकुरु । अखिन्नं भूत्वा टिट्टिभवद्दृढतरमुद्यमं कुरु ।

"उत्सेक उदधेर्यद्वत्कुशाग्रेणैकबिन्दुना ।
मनसो निग्रहस्तद्वद्भवेदपरिखेदतः ॥"

"माण्डूक्यकारिका"

इति संसूचितं टिट्टिभोपाख्यानमनुस्मृत्य धैर्यं धारय । नैरन्तर्येण तात्पर्येण चाभ्यासं कुरु । लयविक्षेपकषायरसास्वादाः समाधिप्रतिबन्धका इति विद्धि । समाध्यभ्यासकाले तदाक्रमणे सति उपायेन सहसा तदतिक्रमणं कुरु । तत्परतन्त्रं माभूः । यदि तत्परवशं स्याः, तर्हि महनीयं समाधिपदमधिरोढुं त्वं कदाऽपि न प्रभविष्यसि । ननु केनोपायेन तदतिक्रमणं स्यादिति चेच्छृणु गौडपादीयं वचनम् :—

"लये सम्बोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः ।
सकषायं विजानीयात्समप्राप्तं न चालयेत् ॥
नाऽऽस्वादयेत्सुखं तत्र निःसङ्गः प्रज्ञया भवेत् ।
निश्चलं निश्चरच्चित्तमेकीकुर्यात्प्रयत्नतः ॥ इति

एवं प्रतिबन्धकीभूतान् लयादीन् विजित्य वृत्तिनिरोधात्मकं समाधिपदमसम्प्रज्ञातमनिशमधिवस । तथाच

नितरामुच्चतरां ज्ञानभूमिकामाधिष्ठितं भव। अनेनास्पर्शयोगेन योगिदुर्दर्शेन सुयोगिनां भयनाशकेन कुयोगिनां तु भयजनकेन च जीवन्मुक्तेरनतिशयमनुपममतिमात्रसुकृतलभ्यश्च विलक्षणं सुखं देवदुर्लभमुपलभस्व।

"स्वस्थं शान्तं सनिर्वाणमकथ्यं सुखमुत्तम"मिदमुपलभ्य नित्यनिर्वृतः कृतकृत्यो भव। एवं नित्यनिरन्तरनिर्वासननिर्वृत्तिकनिर्विकल्पकसमाधिसुखरूपोच्चतरभूमिकालाभपर्यन्तमभ्यासादुपरमं मा कार्षीः। ज्ञानी सन्नपि त्वमलं भावमकृत्वैवमुच्चोच्चतरभूमिकारोहणार्थं पौनःपुन्येनाभ्यासपरो भव।

अथ चैतादृशोच्चतरभूमिकालाभस्तव भवतु मा वा भवतु; ज्ञानोदयबलादेव तव सर्वाणि कर्माणि समूलं विनाशमेष्यन्ति।

तदुक्तम्:—

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्यकर्माणि तस्मिन् दृष्टे परावरे॥" इति

"मुण्डक०"

"ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन ।"

इति च "भगवद्गीता"

आत्मैकत्वज्ञानमुदितं तदुदयसमकालमेव प्रज्वलितो ज्वलनः काष्ठानीव प्रारब्धातिरिक्तानि सर्वाण्यपि कर्माणि भस्मसात् कुरुते । प्रारब्धं तु भोगेनैव शाम्यति । तस्माज्ज्ञानोदयमात्रेण तस्य न नाशः । महाभागैर्महाबलैर्ब्रह्मनिष्ठवरिष्ठैरपि प्रारब्धं कर्म निवर्तयितुं न शक्यते। तस्मादुपभोगेनैव तत् क्षपय । यथाप्रारब्धं व्यवहर व्यवहारानुकूलं चेत्तव तत् । व्यवहारहेतुप्रारब्धभेदाज्ज्ञानिनां व्यवहारभेदः स्यात् । व्यवहारभेदेऽपि न ज्ञानभेदः, ततश्च न मोक्षभेदः ।

तदुक्तम् :—

"प्रारब्धकर्मनानात्वाद् बुद्धानामन्यथाऽन्यथा ।
वर्तनं तेन शास्त्रार्थे भ्रमितव्यं न पण्डितैः ॥
स्वस्वकर्मानुसारेण वर्तन्तां ते यथातथा ।
अविशिष्टः सर्वबोधः समा मुक्तिरिति स्थितिः॥"इति

"पञ्चदशी"

"कृष्णो भोगी शुकस्त्यागी नृपौ जनकराघवौ ।
वसिष्ठः कर्मकर्ता च पञ्चैते ज्ञानिनः समाः ॥" इति च

"केऽपि वर्णाश्रमाचारनिष्ठापरा,
मुग्धबालप्रमत्तोपमाश्चापरे ।
रागिणो भोगिनो योगिनश्चेतरे,
ज्ञानिनां लक्ष्यते नैकरूपा स्थितिः ॥

स्वानन्दे सहजे सदा विहरतां स्वच्छन्दलीलाजुषां,
निस्सङ्गा च निरर्गला च जगतां कल्याणसन्दोहिनी ।
मत्स्यानां सलिलेऽम्बरे च वयसां वायोरिवाशामुखे
दुर्लक्ष्ये पथि योगिनां बहुविधा गूढा विचित्रा गतिः॥"

इति च "स्वाराज्यसिद्धिः"

एवं च विद्वांसः पूर्वकृतकर्मनानात्वाद्विभिन्नसंस्कारा विभिन्नव्यवहाराश्च दृश्यन्ते । तेषां व्यवहारैकरूप्यं न कदाऽपि भवितुमर्हति कर्मनानात्वादेव । अनेकरूपमन्योन्यभिन्नं व्यवहारं विवेकं वा समाधिं वा कुर्वन्तु ते सर्वेऽपि ज्ञानिनः समा मुक्ताश्चेति बोद्धव्यम् ।

व्यवहारप्रधाना विवेकप्रधानाः समाधिप्रधानाश्चेति

ज्ञानिनो जीवन्मुक्तास्त्रिविधा विभज्यन्ते मुनिभिराचार्यैः । स्वस्वसंस्कारानुरूपमनेकरूपं व्यवहरन्ति व्यवहारिणः केचित् । सर्वत्र सर्वदा सम्यग्ब्रह्मवीक्षणपरा अन्ये जीवन्ति विवेकिनः । तथाचान्ये केचिन्नित्यनिरन्तरसमाधिनिष्ठा वर्तन्ते । व्यवहारे विवेके समाधौ च कृतं कर्मैव कारणं कैवल्यभाजां ज्ञानिनामिति वस्तुगतिः । ब्रह्मविद्यया तत्-समकालमेव ब्रह्मभावमुपगतानां प्रबुद्धानां कर्मणा वा समाधिना वा न किञ्चिदस्ति प्रयोजनं नवा हानिः ।

यथोक्तम् :—

"न तस्य कृते नार्थो नाकृते नेह कश्चन ।
नचास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥" इति

"भगवद्गीता"

"समाधिना कर्मकदम्बकैर्वा
वर्द्धेत हीयेत न तस्य किञ्चित् ।
विलासमात्रं बदरीश युष्मद्
भक्तस्य कर्माण्यथवा समाधिः ॥" इतिच

"श्रीबदरीशस्तोत्रम्"

तथाच प्रारब्धफलककर्मप्राबल्याल्लीलान्यायेन खलु तेषां तत्र प्रवृत्तिः। विक्षेपसमाधयः खलु मनसोऽवस्था भेदाः। इन्द्रियमनःसंस्पर्शशून्यानां ब्रह्मभूतानां तेषां विक्षेपसमाधिभिः कौ नाम हानिलाभौ।

उक्तं हि :—

"विक्षेपो नास्ति यस्मान्मे न समाधिस्ततो मम।
विक्षेपो वा समाधिर्वा मनसः स्याद्विकारिणः॥"

इति "पञ्चदशी"

एवं सत्यपि वस्तुतत्त्वे लोकसङ्ग्रहार्थमवश्यं कर्म कर्तव्यं ज्ञानिभिरपि नोपरतवृत्तिभिर्भवितव्यं तैरिति केचित्। अथ स्वार्थं वा परार्थं वा कर्म कर्तुं ज्ञानिनो नाधिकारिणः, अज्ञानिनः खलु तत्राधिकारिणः राग एव कर्मबीजं, स कदापि न विदुषां भवितुमर्हति; ततो न विद्वत्सु कस्यचिदपि कर्मणः प्रसक्तिः; ततश्च समाधिनिष्ठैः सर्वदा भवितव्यं तैरित्यन्ये। हन्त! हन्त! भ्रान्तिमूलकाविमौ द्वावपि पक्षाविति विजानीहि। "कर्म कुरु, समाधिं कुरु" इति ये नियमकिङ्करान् विदुषो विधित्सन्ति, ते हि नूनं

शास्त्ररहस्यानभिज्ञा भ्रान्ताः । शास्त्रानुभवविप्रकृष्टे स्खलिते पथि सञ्चरन्त्युभयवादिनोऽपि ते ।

तदुक्तम् :—

"तत्वज्ञस्य तव प्रशान्तमनसः स्नानाशनादिक्रियामात्रे गात्रविधारकेऽधिकृतिरित्येके वदन्तीतरे ।
कार्यं कर्म जगद्धिताय सततं तेनेति चात्र ब्रुवे
द्वाभ्याञ्च स्खलितं यतो विधिरयं विज्ञे भवेन्नाज्ञवत् ॥
बद्रीवल्लभ को विधिस्त्वयि दृढप्रज्ञं नियन्तुं प्रभुः
कर्माण्याचर तद्विधारयिषया धन्यानि लोकस्य सः ।
अश्रान्तं सुमहान्त्यथेह हिमवत्पार्श्वे जगद्धिस्मरन्
ध्याने मज्जतु वा समं द्वयमपि स्वच्छन्दवृत्तिर्हि वित्"

इति "श्रीबदरीशस्तोत्रम्"

संस्कारवशात्कर्मणि वा समाधौ वा यथारुचि देहपतनावधि प्रवर्तन्ते प्राज्ञाः । तान् तयोरन्यतरस्मिन्नियन्तुं न प्रभवति किमपि प्रमाणम् । निस्त्रैगुण्ये ब्रह्ममार्गे विचरतां महात्मनां कोनाम विधिर्वा निषेधो वा । केनाऽपि वा हेतुना कर्मकरणासमर्थं खलु ब्रह्मविदां शरीरमिति ये ब्रुवन्ति, तानुपहसन्ति चाचार्याः ।

"तत्त्वबोधं क्षयं व्याधिं मन्यन्ते ये महाधियः।
तेषां प्रज्ञाऽति विशदा किं तेषां दुःशकं वद ॥" इति
"पञ्चदशी"

"दृष्ट्वा दुःखशतं दयार्द्रितमना लोकस्य लोके भव-
तत्त्वज्ञोऽपि तमुद्दिधीर्षुरथ चेत् कुर्वीत कर्माश्रमम्।
धन्यं धन्यमतीव तद्वरतमं धन्यस्य बद्रीपते।
नो यक्ष्माभवदीक्षणं हृतबलं येनापटुस्याद्वपुः॥"
इति च "श्रीबदरीशस्तोत्रम्"

ततश्च कर्मणि वा समाधौ वा यथेच्छं प्रवर्तन्तां प्राज्ञप्रवराः, न तत्र मोक्षसतत्वानां तेषां कोऽपि नियमः, मोक्षार्थं न किञ्चिदपि तैरनुष्ठीयते; सकलमपि लीला-कैवल्यमेव तेषामनुष्ठानमिति राद्धान्तः।

तथा त्वमपि ज्ञानवान् यथास्वप्रारब्धं व्यवहृत्य वा समाधाय वा स्वकीयं कालं नय। रागद्वेषाभासौ पुरस्कृत्य व्यवहरन्नपि त्वं मोक्षभागेव भवसि, नामोक्षभाक्। दृढौ रागद्वेषावेव संसारहेतू, नादृढावाभास-रूपाविति विद्धि।

तदुक्तं भगवता वसिष्ठेन :—

"रागद्वेषभयादीनामनुकूलं चरन्नपि ।
अन्तर्व्योमवदत्यच्छः स जीवन्मुक्त उच्यते॥" इति

"वासिष्ठम्"

किञ्च महामहिमशालिनां जीवन्मुक्तानामपि यावज्जीवं रागद्वेषयोस्तन्निबन्धनस्य च व्यवहारस्य क्षयो न भवतीति सुविदितं पुराणवेदिनाम् । देहप्रहाणकालीनं बीतहव्यमुनिवचनं यद्वसिष्ठेनैवोक्तं तदत्र दृष्टान्तरूपमिदं शृणु :-

"राग नीरागतां गच्छ द्वेष निर्द्वेषतां व्रज ।
भवद्भ्यां सुचिरं कालमिह प्रक्रीडितं मया॥" इति

"वासिष्ठम्"

एवं यथाकथमपि यथाप्रारब्धं जीवितशेषमतिवाह्य विमुक्तः सन् विदेहकैवल्यभाग्भव । प्रारब्धशेषपरिक्षये हि तव शरीरपरिक्षयः, ततश्चात्यन्तकी अशरीरमुक्तिः । अस्य शरीरस्य तु परिक्षयेऽविद्याकामकर्मणामभावात् पुनः शरीरग्रहणं तव न स्यात् । तथा विदेहकैवल्येन साक्षाद्ब्रह्मभूतो भव । संसारस्पर्शशून्यमानन्दघनं नित्यं निर-

तिशयं पुनरावृत्तिरहितं स्थानमास्थाय तत्र स्वमहिम्नि नितरां विराजस्व, नितरां मोदस्व ।

तदुक्तम् :—

"यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति ।
एवं मुनेर्विजानत आत्मा भवति गौतम ॥" इति
"कठ०"

अथ ब्रह्मविद्यया निरस्ताविद्यानां ब्रह्मविदां किं लक्षणमिति चेच्छृणु । ब्रह्मविदां तु ब्रह्मवित्त्वं स्वसंवेद्यं, न परसंवेद्यमिति सिद्धान्तः । ब्रह्मविद्या, तत्प्रयुक्ता निर्वाणनिर्वृतिश्च नशक्यते प्रत्यक्षयितुमन्यस्यान्येन ।

उक्तं हि :—

"मोक्षो हि न परावेद्यो मध्वाद्यास्वादसौख्यवत् ।" इति

तथाऽपि बाह्यैर्धर्मैराचरणैश्च कस्यचिज्ज्ञानमहिमाऽनुमीयतेऽन्येन । अत एवोक्तं श्रीभगवता भगवद्गीतासु :—

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥"

इत्यर्जुनप्रश्नस्योत्तरत्वेनस्थितप्रज्ञस्य ब्रह्मविदो लक्षणम् :-

"प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता॥" इत्यादि

अथ तत्रैव निरूपिता ब्रह्मविदां स्वाभाविका गुणाः—

"अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥

इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च ।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥

असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।
नित्यञ्च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥"

इत्यादयः

अथ गुणातीतस्य लक्षणञ्च तत्रैवोपन्यस्तम् :—

"प्रकाशञ्च प्रवृत्तिञ्च मोहमेव च पाण्डव ।

न द्वेष्टि सम्प्रवृत्तानि न निवृत्तानि काङ्क्षति ॥
उदासीनवदासीनो गुणैर्यो न विचाल्यते ।
गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते ॥
समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः ।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ॥"

इत्यादि

अन्ततो दैवीसम्पत्तिश्च सुष्ठु सम्यगुपवर्णिता विमोक्ष हेतुः—

"अभयं सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥
अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥
तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।
भवन्ति सम्पदं दैवीमभिजातस्य भारत" ॥ इति

एते भगवदुक्ता गुणा येषां स्वाभाविकाः खलु विद्यन्ते, ते ज्ञानिनो ब्रह्मनिष्ठा इत्यनुमीयते । न केवलं भगवद्गीतासु, अन्यास्वपि बह्वीषु स्मृतिषु श्रुतिषु चैवं तत्र तत्र

ब्रह्मविल्लक्षणं सुष्ठु निरूपितमिति जानीहि। तथा त्वमपि रे चित्त ! तत्तादृशब्रह्मविल्लक्षणलक्षितं भव क्षिप्रम् ।

इति शम् ।

ब्रह्मैवेदममृतं पुरस्ताद्
ब्रह्मपश्चाद्ब्रह्मदक्षिणतश्चोत्तरेण ।
अधश्चोर्ध्वञ्च प्रसृतं
ब्रह्मैवेदं विश्वमिदं वरिष्ठम् ॥ इति
"मुण्डकोपनिषद्"

इति महात्माऽत्मानन्दविरचिते चित्तसंबोधने
ज्ञानप्रकरणं समाप्तम् ॥

❀ शुभम् ❀